# केरलपाठावलिः

# संस्कृतम्

## दशमी कक्ष्या

संस्कृतविद्यालयानां कृते

# KERALA READER SANSKRIT

## For Sanskrit Schools only

## STANDARD

## 10

Government of Kerala
Department of Education

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING (SCERT), KERALA
2019

## राष्ट्रगीतम्

जनगण मन अधिनायक जय हे
भारत भाग्यविधाता।
पंजाब सिन्ध गुजरात मराठा
द्राविड उत्कल बंगा।
विन्ध्य हिमाचल यमुना गंगा
उच्छलजलधि तरंगा।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे
भारत भाग्यविधाता
जय हे जय हे जय हे
जय जय जय जय हे।

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रीयेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

---

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695 012, Kerala
*Website* : www.scertkerala.gov.in
*e-mail* : scertkerala@gmail.com
Phone : 0471 - 2341883, Fax : 0471 - 2341869
Typesetting and Layout : SCERT; Printed at : KBPS, Kakkanad, Kochi-30
© Department of Education, Government of Kerala

# भूमिका

प्रियच्छात्र !

परिष्कृता अस्माकं पाठ्यपद्धतिः प्रवर्तनाधिष्ठिता छात्रकेन्द्रीकृता च भवति। छात्राणां सर्वतोमुखं विकासमेव अस्याः पद्धतेः लक्ष्यम्। तदनुसारमेव पाठ्यक्रमः स्वीकृतः। पाठ्यक्रमे पाठपुस्तकस्य अद्वितीयं स्थानमस्ति। स्वयं पठनाय सङ्घपठनाय भाषानैपुणीनां विकासाय च पाठपुस्तकमुपकरोति।

नवमकक्ष्याया अनुस्यूततया एवास्य पुस्तकस्य रचना प्रवृत्ता। विविधानां व्यवहाररूपाणां परिचायनाय पुस्तकेऽस्मिन् पठनसन्दर्भाः आयोजिताः। पठितानामाशयानां द्रढीकरणाय नूतनसन्दर्भेषु प्रयोगाय स्वयं मूल्यनिर्णयाय चावकाशः यथायोग्यं दत्ताः।

पुस्तकेऽस्मिन् पञ्च एककानि सन्ति।विषयानुसारमेव एककानां नामानि।प्रत्येकम् एककस्य प्रारम्भे आमुखम् पठनाधिगमाः प्रवेशकप्रवर्तनं च दत्तमस्ति।पाठस्यान्ते प्रवर्तनानि अधिकपठनांशाः चाक्रिकारोहणप्रक्रिया च दत्ताः। पाठभागे अधिकसूचनार्थं केचन भागाः प्रत्येकं पङ्क्तिषु दत्तः। एष भागः अधिकांशस्वीकाराय एव न तु मूल्यनिर्णयाय । एककानामन्ते शब्दकोशः पृथक् दत्तः। पाठभागेष्वागतानां व्याकरणांशानां विवरणं यथास्थानं दत्तमस्ति।

भाषापठनमनायासं सुखप्रदं च कर्तुं पाठपुस्तकमिदं पर्याप्तमिति चिन्तयामि। संस्कृतपठनं सर्वदा मधुरं सफलं च भवतु इति आशंसे।

**डा.जे.प्रसाद्**
निदेशकः
राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्,केरलम्।

## TEXT BOOK DEVELOPMENT COMMITTEE

**SANSKRIT STANDARD X**

### PARTICIPANTS

1 ANITHA S, *HSA, GGHSS Cottonhill, TVPM.*
2 ARAVINDHAKSHAN N, *Teacher, Pathanamthitta.*
3 LEKHA K, *HSA, SNVSHS, Thrikkaruva,Kollam.*
4 RAJALEKSHMI PILLAI, *HSA, Thevalakkara Boys HS, Kollam.*
5 REMAT, *HM, PSHS Chittur, Palakkad.*
6 SABAREES M, *HSS, Mundur, Palakkad.*
7 SANKARANARAYANAN.A. *HSST,GSHSS Trippunithura, Ekm.*

### EXPERTS

1 DR.G.SAHADEVAN, *(Rtd.) Prof. in Sanskrit, University College,Tvm.*
2 DR. K.MOHANDAS, *Sr.Lect.DIET(Rtd.) UCTE Moovaattupuzha.*
3 V. MADHAVAN PILLAI, *(Rtd.) Prof.in Sanskrit, Govt.College for Women,Tvm.*
4 N.K.RAMACHANDRAN, *(Rtd.) DEO Wayanad.*

### ARTISTS

1 SREEDHARAN T.P, *Drawing Teacher, Ramavilasam HSS Chokli, Kannur.*
2 VARGHESE KALATHIL, *Drawing Teacher, GHSS,Pallikkunnu, Kannur.*

### LAYOUT & GRAPHICS

SREEDHARAN T.P, *Drawing Teacher, Ramavilasam HSS Chokli, Kannur.*

### ADVISOR

DR. PROF.VASUDEVAN POTTI.R, *(Rtd.) Govt.Sanskrit College,Thiruvananthapuram.*

### ACADEMIC CO-ORDINATOR

DR. SHAMEEJA.P, *Research Officer (Sanskrit) SCERT*

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः

**STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING , KERALA**

## विषयानुक्रमणिका


| | एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|---|
| I | विचित्रम् | १ | आम्रकूटवर्णना | (काव्यम्) | ८ |
| | | २ | महाश्वेताजन्मवृत्तान्तः | (गद्यम्) | २५ |
| | | ३ | अभिषेकालोचना | (चम्पू) | ३४ |
| II | चित्रम् | ४ | वृत्तपरिचयः | | ४५ |
| | | ५ | अलङ्कारः | | २३ |
| III | शास्त्रम् | ६ | कारकप्रकरणम् | | ५८ |

## पुस्तकसंरक्षणम्

'तैलाद्रक्ष जलाद्रक्ष रक्ष मां श्लथबन्धनात्।
परहस्तगताद्रक्ष'- नित्यं रोदिति पुस्तकम्।।

## संस्कृतभाषा

भाषासु मधुरा रम्या हृद्या गीर्वाणभारती ।

## विद्यायाः महत्वम्

**सर्वेषां शोभमानानां शोभनतमा विद्या ।**

# एककम् १

# ।। विचित्रम् ।।

**आमुखम्**

कविकुलगुरुणा कालिदासेन विरचितात् मेघसन्देशात् आम्रकूटवर्णना , संस्कृतगद्यसाहित्ये प्रथमस्मरणीयस्य बाणभट्टस्य कादम्बरी नामकात् गद्यकाव्यात् महाश्वेतायाः जननम् , राजकविना भोजराजेन विरचितात् रामायणचम्पूकाव्यात् स्वीकृतं रामाभिषेकालोचना च अस्मिन् एकके आयोजिताः।

**पठनाधिगमाः**

काव्यं सतालमालपति।

अन्वयं लिखति।

आशयं लिखति।

वृत्तं निर्णयति।

अलङ्कारान् विवेचयति।

आस्वादनटिप्पणीं लिखति।

व्याख्यानं लिखति।

कथां संक्षिप्य लिखति।

पाठः - १

# आम्रकूटवर्णना

**आमुखम्**

कविकुलगुरोः कालिदासस्य भुवनप्रथितं सन्देशकाव्यं भवति मेघदूतम् । प्रियाविश्लेषितः कश्चित् यक्षः मेघं स्वप्रणयिन्याः समीपं सन्देशहरत्वेन प्रेषयति । एतदेव काव्यस्यास्य इतिवृत्तम् । काव्यमिदं द्विधा विभक्तम् , पूर्वमेघं उत्तरमेघं चेति। पूर्वमेघे रामगिर्याश्रमस्थात् अलकापुरीपर्यन्तं मार्गं वर्णयति। मेघस्य सञ्चारमार्गे दृश्यमानान् देशान् सविस्तरं वर्णयति। पूर्वमेघात् संकलिताः केचित् श्लोकाः अत्र दीयते ।

**मार्गं तावच्छ्रुणु कथयतस्त्वत्प्रयाणानुरूपं**
**सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम्।**
**खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र**
**क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ।।**

**पदच्छेदः**

| | | | | |
|---|---|---|---|---|
| तावच्छ्रुणु | - | तावत् | + | श्रृणु |
| कथयतस्त्वत्प्रयाणानुरूपम् | - | कथयतः | + | त्वत्प्रयाणानुरूपम् |
| चोपभुज्य | - | च | + | उपभुज्य |

**विग्रहः**

| | | |
|---|---|---|
| जलदः | - | जलं ददाति इति जलदः । |
| श्रोत्रपेयम् | - | पातुं योग्यं पेयम् , श्रोत्राभ्यां पेयम् । |
| शिखरिषु | - | शिखराणि सन्ति येषु शिखरिणः तेषु । |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| जलद | हे मेघ |
| तावत् | इदानीं |
| कथयतः | वदतः |
| त्वत्प्रयाणानुरूपम् | भवत्सञ्चारानुकूलम् |
| मार्गम् | पन्थानम् |
| श्रृणु | आकर्णय |
| तदनु | तदनन्तरम् (मार्गश्रवणानन्तरम्) |
| श्रोत्रपेयं | कर्णपानार्हम् |
| मे | मम |
| सन्देशं | दूतम् |
| श्रोष्यसि | आकर्णयिष्यसि |
| यत्र | मार्गे |
| खिन्नः खिन्नः | अभीक्ष्णं विक्लान्तः सन् |
| शिखरिषु | पर्वतेषु |
| पदं | चरणम् |
| न्यस्य | निक्षिप्य |
| क्षीणः | क्षीणः सन् |
| स्रोतसां | निर्झराणाम् |
| परिलघु | अल्पमात्रम् |
| पयश्च | जलं च |
| उपभुज्य | पीत्वा |
| गन्तासि । | गमिष्यसि । |

## भावार्थः

हे मेघ ! प्रथमं मत्सकाशात् त्वत्सञ्चारानुकूलं मार्गमाकर्ण्य सातिशयं सुखदं मदीयं सन्देशं श्रोष्यसि। यस्मिन् मार्गे त्वं गमनायासेन परिश्रान्तः सन् पर्वतेषु विश्रम्य निर्झराणाम् अल्पमात्रं जलं पीत्वा गन्तुमर्हसि।

## धातुरूपाणि

| | | |
|---|---|---|
| श्रोष्यसि | - | श्रृ - श्रवणे लृट् परस्मैपदी म.पु . ए व । |
| गन्तासि | - | गम् + लुट् परस्मैपदी म. पु. ए. व । |

**अद्रेः श्रृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-**
**र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः।**
**स्थानादस्मात्सरसनिचुलादुत्पदोदङ्मुखः खं**
**दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ।।**

## पदच्छेदः

| | | |
|---|---|---|
| किंस्विदित्युन्मुखीभिः | - | किंस्वित् + इति + उन्मुखीभिः |

## विग्रहःवग्रहः

| | | |
|---|---|---|
| मुग्धसिद्धाङ्गनाभिः | - | मुग्धाः च ताः सिद्धाङ्गनाः ताभिः । |
| दृष्टोत्साहः | - | दृष्टो उत्साहः यस्य सः । |
| दिङ्नागानाम् | - | दिशां नागाः तेषाम्। |

| अन्वयः | अन्वयार्थः |
|---|---|
| पवनः | वायुः |
| अद्रेः | पर्वतस्य |
| श्रृङ्गम् | शिखरं |
| हरति | अपहरति |
| किंस्वित् इति | किम् इति |

| | |
|---|---|
| उन्मुखीभिः | उन्नतमुखीभिः |
| मुग्धसिद्धाङ्गनाभिः | मोहनसिद्धसुन्दरीभिः |
| चकितचकितम् | शङ्कायुक्ताभिः सिद्धयोषिद्भिः |
| दृष्टोत्साहः | उत्साहयुक्तः सन् (प्रकटोत्साहः सन्) |
| सरसनिचुलात् | आर्द्रस्थलवेतसात् |
| अस्मात् | एतस्मात् |
| स्थानात् | स्थानात् |
| पथि | मार्गे |
| दिङ्नागानाम् | दिग्गजानाम् |
| स्थूलहस्तावलेपान् | विपुलशुण्डप्रहारान् |
| परिहरन् | अपवारयन् |
| उदङ्मुखः | उत्तरदिशाभिमुखः सन् |
| खम् | आकाशम् |
| उत्पत | उद्गच्छ। |

**भावार्थः**

हे मेघ! वेगातिशयेन गच्छतस्तवोद्योगं वीक्ष्य वातः पर्वतशिखरं हरति किम् ? इति विचिन्त्य मूढाः सिद्धसुन्दर्यः अतिचकिता भविष्यन्ति । ततः आर्द्रस्थलवेतसाद् अस्मात् स्थानात् नभोमार्गे प्रतिरोधकानां दिग्गजानां पीवरशुण्डदण्डाक्रमणानि अपवारयन् अलकागमनार्थं उत्तरमुखाभिमुखः सन् गगनम् उत्पत।

**रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-**
**द्वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य ।**
**येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते**
**बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः।।**

**पदच्छेदः**

प्रेक्ष्यमेतत्पुरस्तात् - प्रेक्ष्यम् + एतत् + पुरस्तात् ।

| | | |
|---|---|---|
| धनुष्खण्डमाखण्डलस्य | - | धनुष्खण्डम् + आखण्डलस्य । |
| वपुरतितरां | - | वपुः + अतितराम् । |

**विग्रहः**

| | | |
|---|---|---|
| रत्नच्छायाव्यतिकरः | - | रत्नानां छायाः रत्नच्छायम् । रत्नच्छायस्य अव्यतिकरः । |
| धनुष्खण्डम् | - | धनुषः खण्डम् । |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| रत्नछायाव्यतिकर इव | विभिन्नरत्नकान्तिमिश्रितम् इव |
| प्रेक्ष्यम् | दर्शनीयम्। |
| आखण्डलस्य | इन्द्रस्य |
| एतत् | समीपतरवर्ति |
| धनुःखण्डम् | कार्मुकशकलम् |
| पुरस्तात् वाल्मीकाग्रात् | अग्रे |
| प्रभवति | आविर्भवति |
| येन | धनुःखण्डेन |
| ते | तव |
| श्यामम् | कृष्णवर्णम् |
| वपुः | शरीरम् |
| स्फुरितरुचिना | उज्ज्वलकान्तियुक्तेन |
| बर्हेण | पिञ्छेन |
| गोपवेषस्य | गोपालवेषस्य |
| विष्णोः (श्यामं वपुः) | कृष्णस्य |
| इव | इव |
| अतितराम् | अत्यर्थम्। |
| कान्तिम् | शोभाम् |
| आपत्स्यते | प्राप्स्यते। |

**भावार्थः**

हे मेघ! विभिन्नरत्नकान्तिमिश्रितमिव मनोहरमेतदिन्द्रायुधं पुरतो वल्मीकविवराद् दृष्टिग्राह्यं भवति , येनोज्ज्वलकान्तिसम्पन्नेन पिञ्छेन गोपवेषस्य कृष्णस्येव त्वदीयं श्यामं शरीरं शोभातिशयसम्पन्नम् भविष्यति।

**धातुरूपाणि**

आपत्स्यते - आङ् पत्ल् गतौ आत्मनेपदी लृट् प्र. पु. ए. व ।

**त्वय्यायत्तं! कृषिफलमिति भ्रूविलासानभिज्ञैः**
**प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।**
**सद्यस्सीरोत्कणसुरभि क्षेत्रमारुह्य मालं**
**किञ्चित्पश्चात् व्रज लघुगतिर्भूय एवोत्तरेण।।**

**पदच्छेदः**

त्वय्यायत्तम् - त्वयि + आयत्तम्

**विग्रहः**

भ्रूविलासनभिज्ञैः - भ्रूविलासेषु अनभिज्ञानि तैः ।
जनपदवधूलोचनैः - जनानां पदं यस्मिन् स जनपदः, तासां वधूनां लोचनानि जनपदवधूलोचनानि तैः ।
सीरोत्कषणसुरभि - सीरैः उत्कषणं , तेन सुरभि तद् यथा तथा ।
लघुगतिः - लघ्वी गतिः यस्य सः ।

| अन्वयः | अन्वयार्थः |
|---|---|
| कृषिफलम् | फलपुष्टिः |
| त्वयि | भवति (मेघे) |
| आयत्तम् | अधीनम् |
| इति | अस्मात् कारणात् |
| भ्रूविलासानभिज्ञैः | कटाक्षविक्षेपापण्डितैः |
| प्रीतिस्निग्धैः | स्निग्धमधुरैः |
| जनपदवधूलोचनैः | ग्रामीणनारीनेत्रैः |
| पीयमानः | आस्वाद्यमानः यावत् |
| मालम् | मालनामकम् |
| क्षेत्रम् | केदारम् |
| सद्यः | तत्क्षणम् |
| सीरोत्कषणसुरभिः | हलविदारणेन सुरभिः |
| आरुह्य | आरोहणं कृत्वा |
| किञ्चित् पश्चात् | किञ्चित्स्वल्पम् (पश्चिमदेशं प्रति) |
| व्रज | गच्छ |
| भूयः | पुनरपि |
| उत्तरेण एव | उत्तरमार्गेण एव |
| व्रज | गच्छ |

### भावार्थः

हे मेघ! कृषीफलं त्वयि अधीनं भवति इति सन्तुष्टचित्ताभिः ग्रामीणवनिताभिः साकूतं वीक्ष्यमाणाः हलविदारणेन सौरभसम्पन्नं मालाख्यं केदारमारुह्य किञ्चित् दूरं पुनः सत्वरगत्या भूयः उत्तरमार्गेण एव गच्छ ।

**धातुरूपाणि**

व्रज - व्रज + लोट् - पर - म.पु- ए।

**त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना**
**वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।**
**न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय**
**प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः।।**

**पदच्छेदः**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| वक्ष्यत्यध्वश्रमपरिगतम् | - | वक्ष्यति | + | अध्वश्रमपरिगतम् | | | | |
| पुनर्यस्तथोच्चैः | - | पुनः | + | यः | + | तथा | + | उच्चैः । |
| क्षुद्रोऽपि | - | क्षुद्रः | + | अपि । | | | | |

**विग्रहः**

| | | |
|---|---|---|
| प्रथमसुकृतापेक्षया | - | प्रथमं च तत् सुकृतं च तस्य अपेक्षा तया |
| आम्रकूटः | - | आम्राः कूटेषु यस्य सः । |
| आसारप्रशमितः | - | आसारैः प्रशमितः। |
| वनोपप्लवः | - | वनस्य उपल्पवः |
| आसारप्रशमितवनोपप्लवम् | - | आसारप्रशमितो वनोपप्लवो येन सः तम् । |
| विमुखम् | - | विरुद्धं मुखं यस्य सः |

**कोशः**

" क्षुद्रे दरिद्र कृपणे नृशंसे मित्रं सखा सुहृत् "

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| सानुमान् | पर्वतः |
| आम्रकूटः | आम्रकूटनामकः |

| | |
|---|---|
| आसारप्रशमितवनोपप्लवम् | धारासंपातनिवारितदावानलम् |
| अध्वश्रमपरिगतम् | मार्गक्लेशबाधितम्। |
| त्वाम् | भवन्तम् |
| मूर्ध्ना | शिरसा |
| साधु | समीचीनं यथा तथा |
| वक्ष्यति | धरिष्यति |
| क्षुद्रः अपि | निसारोऽपि |
| संश्रयाय | आश्रयाय |
| मित्रे | सुहृदि |
| प्राप्ते सति | आगते सति |
| प्रथमसुकृतापेक्षया | पूर्वोपकृतस्मरणया |
| विमुखः | पराङ्मुखः |
| न भवति | न वर्तते |
| तथा | तेन प्रकारेण |
| उच्चैः | उन्नतैः |
| किं पुनः | किं वक्तव्यम् |

**भावार्थः**

हे मेघ! धारासम्पातेन निवारितदावाऽनलं मार्गक्लेशबाधितं त्वाम् आम्रकूटपर्वतः शिखरेण सम्यक् धारयिष्यति। यतः नीचोऽपि आश्रयाय संप्राप्तं मित्रं वीक्ष्य पूर्वकृतोपकारस्मृत्या पराङ्मुखो न भवति,यस्तादृश उन्नतः सः पराङ्मुखो न भवतीति किम् वक्तव्यम् ।

**तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-**
**र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।**
**अन्तःसारं घन ! तुलयितुं नानिलः शक्ष्यति त्वां**
**रिक्तस्सर्वो भवति हि लघु पूर्णता गौरवाय ।।**

**पदच्छेदः**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| तस्यास्तिक्तैर्वनगजमदैर्वासितम् | - तस्याः | + | तिक्तैः | + | वनगजमदैः | + | वासितम् |
| नानिलः | - न | + | अनिलः | | | | |

**विग्रहः**

| | |
|---|---|
| वनगजमदैः | - वनगजानां मदाः तैः |
| वान्तवृष्टिः | - वान्तावृष्टिः यः सः । |
| प्रतिहतरयम् | - प्रतिहतो रयं यस्य तत्। |
| अन्तःसारः | - अन्तः सारो यस्य सः |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| वान्तवृष्टिः | उद्गीर्णवर्षः (सन्) |
| त्वाम् | भवन्तम् |
| तिक्तैः | सुगन्धिभिः |
| वनगजमदैः | वनगजानां मदजलैः |
| वासितम् | सुरभितम् (भवितं च) |
| जम्बुनिकुञ्जैः प्रतिहतरयम् | जम्बूनिकुञ्जैः प्रतिरुद्धवेगम् |
| तस्याः | रेवायाः |
| तोयम् | जलम् |
| आदाय | गृहीत्वा |
| गच्छेः | व्रजेः |
| हे घन ! | मे मेघ |
| अनिलः | मारुतः |
| अन्तःसारम् | अन्तःसारयुक्तं सजलम् |
| तुलयितुम् | कम्पयितुम् |
| न शक्ष्यति | न शक्तः भविष्यति |
| हि | यतः |
| रिक्तः | शून्यः |

| | |
|---|---|
| सर्वे | सकलः |
| लघु | लाघवयुक्तः |
| भवति | वर्तते |
| पूर्णता | समग्रता |
| गौरवाय | गुरुत्वाय |

**भावार्थः**

हे मेघ! तत्र वर्षणोत्तरं सुगन्धिभिः वनगजानां मदजलैः सुरभितं जम्बूकुञ्जप्रतिबद्धवेगं नर्मदा जलं गृहीत्वा गच्छ। इत्थम् अन्तःसारं त्वां वायुस्तुलयितुं समर्थो न भविष्यति । यतः सर्वोऽपि रिक्तो लघुः भवति पूर्णश्च गुरुः सम्पद्यते।

शक्ष्यति - शक् धातु परस्मैपदि लृट् . प्र. पु. ए. व।

गच्छेः - गम् विधिलिङ् म. पु. ए. व ।

**नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-**
**राविर्भूतप्रथममुकुलाकन्दलीश्चानुकच्छम् ।**
**जग्ध्वाराण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः**
**सारंगास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ।।**

**पदच्छेदः**

| | | |
|---|---|---|
| केसरैरर्धरूढैः | - | केसरैः + अर्धरूढैः। |
| कन्दलीश्चानुकच्छम् | - | कन्दलीः + च + अनुकच्छम्। |
| गन्धमाघ्राय | - | गन्धम् + आघ्राय। |

**विग्रहः**

| | | |
|---|---|---|
| सारङ्गाः | - | साराणि अङ्गानि येषां ते । |
| जललवमुचः | - | जललवान् मुञ्चतीति जललवमुक् तस्य । |

| अन्वयः | अन्वयार्थः |
|---|---|
| सारङ्गाः | हस्तिनः, चातकाः, हरिणः |
| अर्धरूढैः | अर्धविकसितैः |
| केसरैः | किञ्चलकैः |
| हरितकपिशम् | पलाशकृष्णपीतम् |
| नीपम् | स्थलकदम्बकुसुमम् |
| दृष्ट्वा | अवलोक्य (ज्ञात्वेति यावत्) |
| अनुकच्छम् | कच्छं कच्छं प्रति |
| आविर्भूतप्रथममुकुलाः | उद्भूतप्रथममुकुलाः |
| कन्दलीश्च | भूमिकदलीः च |
| जग्ध्वा | भक्षयित्वा |
| अरण्येषु | वनेषु |
| अधिकसुरभिम् | अधिकसुगन्धयुक्तम् |
| उर्व्याः | पृथिव्याः |
| गन्धम् | सौरभ्यम् |
| आघ्राय | घ्रात्वा |
| जललवमुचः | सलिलकणमोचकस्य |
| ते | तव (मेघस्य) |
| मार्गम् | पन्थानम् |
| सूचयिष्यन्ति। | प्रदर्शयिष्यन्ति । |

**भावार्थः**

हे मेघ! ततः परं स्थलकदम्बपुष्पोद्गमं वीक्ष्य प्रकटपूर्वककुड्मला भूमिकन्दलीश्च भक्षयित्वा वनेष्वतिसुरभिं भूमिगन्धम् आघ्राय च भृङ्गा मृगा मातङ्गाः च वृष्टिं विदधत्ते मार्गं सूचयिष्यन्ति।

**उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः**
**कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।**
**शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः**
**प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ।।**

**विग्रहः**

| | | |
|---|---|---|
| यियासोः | - | यातुमिच्छुः यियासुः तस्य। |
| सजलनयनैः | - | सजले नयने येषां ते सजलनयनाः तैः । |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| हे सखे | हे मित्र ! |
| मत्प्रियार्थम् | मदभीष्टसम्पादनार्थम्(मद्धितार्थम्) |
| द्रुतम् | शीघ्रम् |
| यियसोरपि | यातुमिच्छतोरपि |
| ते | तव |
| ककुभसुरभौ | कुटजपुष्पसुगन्धिनि |
| पर्वते पर्वते | शैले शैले |
| कालक्षेपम् | समयविलम्बम् |
| उत्पश्यामि | उत्प्रेक्षे |
| सजलनयनैः | आनन्दाश्रुसहितनेत्रैः |
| शुक्लापाङ्गैः | मयूरैः |
| केकाः | मयूरवाणिभिः |
| स्वागतीकृत्य | स्वागतं व्याहृत्य |
| प्रत्युद्यातः | प्रत्युद्गतः (मयूरवाणिकृतातिथ्य) |
| भवान् | मेघः |

| | |
|---|---|
| आशु | शीघ्रम् |
| गन्तुम् | यातुम् |
| कथमपि | कथम्(यथाकथञ्चित्) |
| व्यवस्येत् | उद्युञ्जीत |

**भावार्थः**

हे मित्र! मदभीष्टसम्पादनार्थं सत्वरं जिगमिषोरपि ते कुटजकुसुमसुरभौ शैले शैले कालविलम्बं संभावयामि। त्वदागमनेन आनन्दाश्रुयुक्तनेत्रा मयूराः मधुरकेकारवैः स्वागतीकृत्या त्वां यदा प्रत्युद्गमिष्यन्ति तदा कथमपि भवान् गन्तुम् उत्सहते ।

**धातुरूपाणि**

व्यवस्येत् - वि + अव + षो + विधिलिङ् प्र.पु.ए.व।

**पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै**

**र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः।**

**त्वय्यासन्ने परिणतफलश्यामजंबूवनान्ताः**

**संपत्स्यन्ते कतिपयदिनस्थायिहंसाः दशार्णाः ।।**

**पदच्छेदः**

त्वय्यासन्ने - त्वयि + आसन्ने ।

**विग्रहः**

नीडारम्भैः - नीडानाम् आरम्भाः तैः ।

पाण्डुच्छायोपवनवृतयः - पाण्डुश्च असौ छाया च पाण्डुच्छाया, तैः युक्तैः उपवनैः वृताः ।

| अन्वयः | अन्वयार्थः |
|---|---|
| त्वयि | भवति |
| आसन्ने | सन्निकृष्टे (सति) |
| दशार्णाः | दशार्णनामका देशाः |
| सूचिभिन्नैः | मुकुलाग्रविकसितैः |
| केतकैः | केतकीपुष्पैः |
| पाण्डुच्छायोपवनवृतयः | पाण्डुरवर्णशोभितैः उपवनैः परिवेष्टितः । |
| गृहबलिभुजाम् | गृहवायसानाम् |
| नीडारम्भैः | नीडनिर्माणव्यग्रैः |
| आकुलग्रामचैत्याः | मुखरितवनस्पतयः |
| परिणतफलश्यामजम्बुवनान्ताः | परिपक्वैः जम्बूफलैः श्यामायमानाः वनान्ताः |
| तथा कतिपयदिनस्थायिहंसाः | किञ्चित् कालपर्यन्तं स्थातुमुत्सुकाः हंसाः |
| संपत्स्यन्ते | भविष्यन्ति। |

**भावार्थः**

हे मेघ! त्वयि निकटवर्तिनि सति दशार्णदेशोपवनानि केतकीपुष्पैर्हरितवर्णप्राचीरयुक्तानि ग्रामस्थ वृक्षाः ग्रामीणकाकैः सङ्कीर्णा जम्बूवनानि च परिपक्वफलैः श्यामायमानानि , एवं च तत्र हंसाः वर्षारम्भकालं वीक्ष्य कतिपयदिनानि यावत् स्थास्यन्ति।

**विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्च-**
**न्युद्यानानां नवजलकणैर्यूथिकाजालकानि।**
**गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां**
**छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम् ।।**

**पदच्छेदः**

सिञ्चन्नुद्यानानाम् - सिञ्चन् + उद्यानानाम् ।

**विग्रहः**

नवजलकणैः - नवानि च तानि जलानि तेषां कणाः तैः ।

पुष्पलावीमुखानाम् - पुष्पाणि लुनन्ति इति पुष्पलाव्यः पुष्पलावीनां मुखानि एषां तासाम्।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| विश्रान्तः सन् | अपनीतक्षीणः सन् |
| वननदीतीरजातानि | वननिर्झरीतटरुहाणि |
| उद्यानानाम् | आरामाणाम् |
| यूथिकाजालकानि | मल्लिकामुकुलानि |
| नवजलकणैः | नूतनजललवैः (कणैः) |
| सिञ्चन् | सेचनं कुर्वन् |
| गण्डस्वेदापनयनरुजा | कपोलस्वेदजलदूरीकरणश्रमेण |
| क्लान्तकर्णोत्पलानाम् | क्लिन्नकर्णपुष्पयुक्तानाम् |
| पुष्पलावीमुखानाम् | कुसुमानि लुनन्तीनाम् स्त्रीणां मुखानाम् |
| छायादानाद् | छायाविदरणात् |
| क्षणपरिचितः | कञ्चित्कालसंयुतः सन् |
| व्रज | गच्छ |

**भावार्थः**

हे मेघ! विगतक्षीणो भवान् वननदीतीरस्थाः मल्लिकालताः नूतनजलकणैः सिञ्चन् सूर्यातपेन क्लिष्टानां नारीमुखानि क्षणं छायया सान्त्वयन् च गच्छ ।

तत्र पुष्पाण्याहर्तुमागमिनीनां नारीणां कपोलाः सूर्यातपेन श्वेताकीर्णाः भविष्यन्ति । हस्ते पुष्पाणि सन्ति इत्यतः ताः स्वभुजः स्वेतापनयनं करिष्यन्ति । तदा तासां कर्णोत्पलानि भुजसंसर्गेण क्लिन्नानि भवेयुः। मेघः तासां कृते क्षणं छायां दत्वा गन्तुमर्हः इत्याशयः ।

## पठनप्रवर्त्तनानि

**श्लोकान् सतालमालपतु ।**

**श्रद्धेयाः अंशाः-**

अर्थग्रहणम् ।

स्पष्टोच्चारणम्।

तालात्मकता।

**पाठभागं पठित्वा कालिदासस्य वर्णनापाटवमधिकृत्य स्ववाक्यैर्लिखतु ।**

**श्रद्धेयाः अंशाः-**

आशयावबोधः।

वर्णनापाटवम्।

भाषाशुद्धिः।

**पाठभागं पठित्वा श्लोकानाम् आशयमवगम्य आस्वादनटीकां रचयतु।**

**श्रद्धेयाः अंशाः-**

आशयावबोधः।

वर्णनापाटवम्।

भाषाशुद्धिः।

**सन्देशकाव्यानां कवीनां च नामानि सञ्चित्य लिखतु ।**

**श्रद्धेयाः अंशाः-**

सञ्चयनसामर्थ्यम्।

**अष्टदिग्गजाः**

ऐरावतः

पुण्डरीकः

वामनः

कुमुदः

अञ्जनः

पुष्पदन्तः

सार्वभौमः

सुप्रतीकः

# महाश्वेताजन्मवृत्तान्तः


## आमुखम्

बाणभट्टः भगवत्याः शारदायाः लब्धवरः आसीत् ।

महाकविचूडामणिरयं स्वजीवचरितं हर्षचरितस्य प्रथमे द्वितीये च उच्छ्वासे विस्तरेण वर्णितवान्। ब्रह्मणः वंशे उत्पन्नस्य अस्य पिता चित्रभानुः माता राजादेवी च। सः श्रीहर्षदेवस्य सभापण्डितः आसीत्। हर्षचरितं , कादम्बरी, पार्वतीपरिणयं, चण्डीशतकं इत्यादयः अनेन विरचिताः ग्रन्थाः ।

कादम्बरी बाणभट्टस्य प्रसिद्धं गद्यकाव्यं भवति। तत् तु कथानामकगद्यभेदे अन्तर्भवति। बाणभट्टमधिकृत्य प्रथाप्यस्ति "बाणोच्छिष्टं जगत्सर्वम्" इति। कादम्बरीमधिकृत्य "कादम्बरी रसज्ञाने आहारोऽपि न रोचते" इत्यपि प्रसिद्धिरस्ति । कादम्बरीकथायाः पूर्वार्धे महाश्वेतावृत्तान्तं अतिमनोहारितया वर्णयति ।

उज्जयिन्याः राजपुत्रःभवति चन्द्रापीडः। दिग्विजयार्थं प्रस्थितः सः किन्नरमिथुनेन आकृष्टः घोरारण्ये एकाकी सन् अगच्छत्। महावने मधुरां कामपि शिवस्तुतिं श्रुत्वा तत्प्रभवस्थानमन्विष्य गच्छन् सः त्र्यबंकस्य पुरतः अवस्थितां कन्यकाम् अपश्यत्। चन्द्रापीडः तां दृष्ट्वा सकुतुकं तस्याः वृत्तान्तम् अपृच्छत्। सा तु तावतीं स्वजीवितकथां तस्मै न्यवेदयत् ।



**राजपुत्र ! किमनेनातिनिर्घृणहृदयायाः मम मन्दभाग्यायाः पापायाः जन्मनः प्रभृति वैराग्यवृत्तान्तेनाश्रवणीयेनश्रुतेन ? तथापि यदि महत् कुतूहलम्, तत् कथयामि, श्रूयताम् ।**

---

पदार्थः-

*राजपुत्र = भोः राजकुमार , अतिनिर्घृणहृदयायाः = अतिनिर्घृणं नितान्तनिष्ठूरं हृदयं चेतः यस्याः, तस्याः, मन्दभाग्यायाः = भाग्यशून्यायाः, पापायाः = पापिष्ठायाः, मम = कन्यकायाः (महाश्वेताया इति), जन्मनः प्रभृति उत्पत्तेरारभ्य, अश्रवणीयेन = श्रवणायोग्येन, वैराग्यवृत्तान्तेन = विरक्तोदन्तेन, अनेन श्रुतेन = श्रवणेन किं = किं फलम्, तथापि = एवं सत्यपि , यदि = चेत्, महत्कुतूहलं = महत्कौतुकम् (तर्हि), तत् = वृत्तान्तम्, कथयामि = वदामि,श्रूयताम् = (भवता) आकर्ण्यताम्।*

भावार्थः-

*कल्याणाभिनिवेशिनः एतत्प्रायेण कर्णगोचरताम् आगतम् एव यथा विबुधानां देवानां स्वर्गे अप्सरसः नाम अविवाहिताः स्त्रियः सन्ति इति) वर्तन्ते । अप्सरसाम् चतुर्दशवंशाः ।*

एतत् प्रायेण कल्याणाभिनिवेशिनः श्रुतिविषयमापतितमेव, यथा विबुधसद्मनि अप्सरसो नाम कन्यकाः सन्तीति। तासां चतुर्दशकुलानि, एकं भगवतः कमलयोनेर्मनसः समुत्पन्नम्, अन्यद्वेदेभ्यः सम्भूतम्, अन्यदग्नेरुद्भूतम् अन्यत्पवनात् प्रसूतम्, अन्यदमृतान्मथ्यमानादुत्थितम्, अन्यज्जलाज्जातम्, अन्यदर्ककिरणेभ्योनिर्गतम् , अन्यत्सोमरश्मिभ्यो निष्पादितम्, अन्यद्भूमेरूद्भूतम् ,अन्यत् सौदामिनीभ्यः प्रवृत्तम्, अन्यन्मृत्युना निर्मितम्, अपरं मकरकेतना समुत्पादितम्, अन्यत् तु दक्षस्य प्रजापतेरतिप्रभूतानां सुतानां मध्ये द्वे सुते मुनिररिष्ठा च बभूवतुस्ताभ्यां गन्धर्वैः सह कुलद्वयं जातम्। एवमेतान्येकत्र चतुर्दश कुलानि ।



*पदार्थः-*

*कल्याणाभिनिवेशिनः = कल्याणे शिवे अभिनिवेशः आग्रहः यस्य तस्य भवतः, एतत् = मया कथ्यमानम्, प्रायेण = प्रायशाः, श्रुतिविषयं = कर्णगोचरताम्, आपतितम् = आगतम्, एव = यथा, विबुधसद्मनि = विबुधानां देवानां सद्मनि गृहे (स्वर्गे इत्यर्थः), अप्सरसः नाम तदभिधानाः कन्यकाः = अविवाहिता स्त्रियः, सन्ति = वर्तन्ते, तासां = अप्सरसाम्, चतुर्दश = दशाधिकचतुरसंख्याकानि, कुलानि = वंशाः, (भवन्ति), एकं = वंशम्, भगवतः = श्रीमतः, कमलयोनेः = ब्रह्मणः, मनसः = चित्तात्, समुत्पन्नम् = जातम् । अन्यत् = द्वितीयम्, वेदेभ्यः = श्रुतिभ्यः, सम्भूतम् = उत्पन्नम्, अन्यत् = तृतीयम्, अग्नेः = अनलात् , उद्भूतम् = जातम्, अन्यत् = चतुर्थम् , पवनात् = वायोः, प्रसूतम् = उत्पन्नम्, अन्यत् = पञ्चमं , मथ्यमानात् = विलोढमानात्, अमृतात् = पीयूषात्, उत्थितम् = जातम्, अन्यत् = षष्ठम्, जलात् = पयसः, जातं = समुत्पन्नम् , अन्यत् = सप्तमम्, अर्ककिरणेभ्यः = सूर्यरश्मिभ्यः, निर्गतम् = निःसृतम्, अन्यत् = अष्टमम् , सोमरश्मिभ्यः = चन्द्रकिरणेभ्यः, निष्पतितं = निर्गतम्, अन्यत् = नवमं । भूमेः = पृथिव्याः, उद्भूतम् = जातम्, अन्यत् = दशमं, सौदामिनीभ्यः = विद्युद्भ्यः , प्रवृत्तम् = उत्पन्नम्, अन्यत् = एकादशं, मृत्युना = यमेन, निर्मितम् = रचितम्, अपरम् = द्वादशं, मकरकेतुना = कामदेवेन, समुत्पादितम् = उत्पन्नम्, अन्यत् = त्रयोदशम्, तु = तावत्, प्रजापतेः दक्षस्य = एतन्नामकस्य, अतिप्रभूतानाम् = अत्यधिकानाम् , सुतानाम् = आत्मजानाम्, मध्ये अन्तरे, द्वे = सुते कन्यके, मुनिः = एतन्नामा, अरिष्टा = एतन्नामा च, बभूवतुः = जज्ञाते। ताभ्यां पूर्वोक्ताभ्याम् = कन्यकाभ्याम्, गन्धर्वैः सह = देवगायकैः सह, कुलद्वयम् = वंशयुगलम्, जातम् = उत्पन्नम्, एवम् = अनेन प्रकारेण, एकत्र = सङ्कलनेन(एतानि), चतुर्दशकुलानि = चतुर्दशसंख्याकाः वंशाः ।*

*भावार्थः-*

*एकं वंशं श्रीमतः ब्रह्मणः चित्तात् जातम्। अन्यत् श्रुतिभ्यः उत्पन्नम्। अन्यत् अग्नेः जातम्। अन्यत् जलात् समुत्पन्नम् । अन्यत् सूर्यरश्मिभ्यः निर्गतम्। अन्यत् चन्द्रकिरेणेभ्यः निर्गतम्। अन्यत् पृथिव्याः उद्भूतम्। अन्यत् विद्युद्भ्यः उत्पन्नम् । अन्यत् यमेन निर्मितम्। अन्यत् कामदेवेन समुत्पादितम् ।अन्यत् तु दक्षनामकस्य अत्यधिकानाम् आत्मजानाम् अन्तरे द्वे सूते मुनिः अरिष्टा च बभूवतुः। पूर्वोक्ताभ्यां कन्यकाभ्यां गन्धर्वैः सह वंशयुगलं जातम्। अनेन प्रकारेण एकत्र चतुर्दशसंख्याकाः वंशाः।*

**गन्धर्वाणान्तु दक्षात्मजाद्वितयसम्भवं तदेव कुलद्वयं जातम्। तत्र मुनेस्तनयाश्चित्रसेनादीनां पञ्चदशानां भ्रातॄणामधिको गुणैः षोडशश्चित्ररथो नाम समुत्पन्नः। स किल त्रिभुवनप्रख्यातपराक्रमो भगवता समस्तसुर-मौलि-माला-लालित-चरण-नलिनेनाखण्डलेन सुहृच्छब्देनोपबृंहितप्रभावः सर्वेषां गन्धर्वाणामाधिपत्यमसिलतामरीचिनिचयमेचकितेन बाहुना समुपार्जितं शैशव एवाप्तवान् ।**

पदार्थः-

*गन्धर्वाणाम्= देवगायकानाम् , दक्षात्मजद्वितयसम्भवम् मुनिररिष्टानामकात् = दक्षकन्यकाद्वयात्, सम्भवम् = समुत्पन्नम्, तदेव पूर्वोक्तमेव , कुलद्वयम् = वंशयुगलम्, जातम् = उत्पन्नम्, तत्र = तस्मिन् कुलद्वये, मुनेः = दक्षात्मजायाः , चित्रसेनादीनाम् = एतन्नामकादीनाम्, पञ्चदशानाम् = पञ्चदशसंख्याकानाम् , भ्रातॄणाम् = सोदराणाम्, गुणैः = शौर्यादिगुणैः , अधिकः = गरीयान् , षोडशः= षोडशसंख्याकः, चित्ररथः नाम = एतत् नामकः , समुत्पन्नः = जातः, त्रिभुवनप्रख्यातपराक्रमः = त्रिभुवने त्रिलोके प्रख्यातः विख्यातः पराक्रमः शौर्यः यस्य सः, समस्तसुरमौलिमाला लालितचरणनलिनेन = समस्तानां सकलानां सुराणां देवानां मौलिमालया मुकुटपंक्त्या लालितम् प्रणामसमये समादरं स्पृष्टम् चरणनलिनं पादपङ्कजम् यस्य तेन , भगवता = ईश्वरेण, आखण्डलेन = इन्द्रेण , सुहृच्छब्देन = मित्रसंम्बोधनेन, उपब्रंहितप्रभावः = उपबृम्हितः परिवर्धितः, प्रभावः प्रतापः यस्य सः पूर्वोक्तः चित्ररथः, असिलतामरीचिनिचयमेचकितेन = असिलतायाः मरीचिनिचियेन रश्मिसूहेन, मेचकितः = श्यामीकृतः , तेन, बाहुना = भुजेन, समुपार्जितम् = प्रप्तम्। सर्वेषां = समस्तानां, गन्धर्वाणाम् = देवगायकानाम्, आधिपत्यम् = प्रभुत्वम्, शैशव एव = बल्ये एव, आप्तवान् = लब्धवान्।*

भावार्थः-

*देवगायकानां मुनिररिष्टानामकात् दक्षकन्यकाद्वयात् समुत्पन्नं पूर्वोक्तमेव कुलद्वयं जातम् । तस्मिन् कुलद्वयमध्ये मुनेः चित्रसेनानामकादीनां पञ्चदशानां सहोदरणां शौर्यादिगुणैः अधिकः षोडशसंख्याकः चित्ररथनामकः जातः। त्रिभुवनप्रख्यातपराक्रमः भगवता ईश्वरेण समस्तसुरमौलिमालालालितचरणनलिनेन इन्द्रेण मित्रसंबोधनेन परिवर्धितः प्रतापः सर्वेषां गन्धर्वाणां आसिलतामरीचिनिचयमेचकितेन बहुना प्रभुत्वं शैशवे एव लब्धवान् ।*

**इतश्च नातिदूरे तस्यास्माद्भारतवर्षादुत्तरेणानन्तरे किम्पुरुषनाम्नि वर्षे वर्षपर्वतो हेमकूटो नाम निवासः। तत्र च तद्भुजयुगलपरिपालितान्यनेकानि गन्धर्वशतसहस्राणि प्रतिवसन्ति। तेनैव चेदं चैत्ररथं नामातिमनोहरं काननं निर्मितम्, इदञ्चाच्छोदाभिधानमतिमहत् सरः खानितम्, अयञ्च भवानीपतिरुपरचितो भगवान् ।**

*पदार्थः-*

*इतः = अस्मात् , नातिदूरे उ समीपवर्तिनि, अस्मात् भारतवर्षात् = अस्माकं भारतदेशात्, उत्तरेणानन्तरे = अप्यवहितोत्तरे, किंपुरुषनाम्नि = किंपुरुषाभिधाने, वर्षे = क्षेत्रे, वर्षपर्वतः उ क्षेत्रसीमाकृन्नगः , हेमकूटो नाम =हेमकूटाभिधानः, तस्य = चित्ररथस्य, निवासः आश्रमस्थानम्। तत्र = तस्मिन् हेमकूटे , तद्भुजपरिपालितानि = तस्य चित्ररथस्य भुजयुगलेन परिपालितानि परिरक्षितानि , अनेकानि =बहूनि, गन्धर्वशतसहस्राणि =देवगायकसूहाः, प्रतिवसन्ति =निवसन्ति, तेन एव = पूर्वोक्तेन चित्ररथेन एव, इदम् = विद्यमानम्, चैत्ररथं नाम = एतन्नामकम् , अतिमनोहरम् = अतिरमणीयम्, काननम् = वनम्, निर्मितम् = रचितम्, इदं च = पुरो वर्तमानं च, अच्छोदाभिधानम् = एतन्नामकम्, अतिमहत् = गहनविस्तृतम्, सरः = सरोवरः, खानितम् = निर्मापितम्, अयं च एषः = पुरो विद्यमानः च, भगवान् = ऐश्वर्यसंपन्नः,भवानीपतिः शङ्करः, उपरचितः = निर्माय प्रतिष्ठापितः।*

*भावार्थः-*

*अस्मात् स्थानात् समीपवर्तिनि भारतदेशात् उत्तरेणानन्तरं किं पुरुषाभिधाने क्षेत्रे वर्षपर्वतः हेमकूटाभिधानः चित्ररथस्य वासस्थानम् । तस्मिन् हेमकूटे चित्ररथस्य करद्वयेन पुरोवर्तमानं च अच्छेदाभिधानम् अतिविशालं सरोवरः निर्मापितः । अयं च ऐश्वर्यसम्पन्नः शङ्करः प्रतिष्ठापितः।*

**अरिष्ठायास्तु पुत्रस्तुम्बुरुप्रभृतीनां सोदर्य्याणां षण्णां ज्येष्ठो हंसो नाम जगद्विदितो गन्धर्वः तस्मिन् द्वितीये गन्धर्वकुले गन्धर्वराजेन चित्ररथेनैवाभिषिक्तो बाल एव राज्यपदमासादितवान् । अपरिमितगन्धर्वबलपरिवारस्य तस्यापि स एव गिरिरधिवासः।**

**यत्तु तत् सोममयूखसम्भवमप्सरसां कुलम्, तस्मात् किरणजालानुसार-गलितेन सकलेनेव रजनिकर- कला- कलापलावण्येन निर्मिता त्रिभुवननयनाभिरामा भगवती द्वितीयेव गौरी , गौरीति नाम्ना हिमकर-किरणावदातवर्णा कन्यका प्रसूता । ताञ्च द्वितीयगन्धर्वकुलाधिपतिः हंसो मन्दाकिनीमिव क्षीरसागरः प्रणयिनीमकरोत् । सा तु भगवता मकरकेतुनेव रतिः, शरत्समयेनेव कमलिनी, हंसेन संयोजिता सदृशसमागमोपजनितामतिमहतीं मुदमुपगतवती निखिलान्तःपुरस्वामिनी च तस्या भवत्। तयोश्च तादृशयोर्महात्मनोरहमीदृशी विगतलक्षणा शोकाय केवलमनेकदुःखसहस्रभाजनमेकैवात्मजा महाश्वेताभिधाना समुत्पन्ना।**

---

*पदार्थः-*

*अरिष्टायाः = अपरायाः, तुम्बुरुप्रभृतीनाम् = तुम्बुर्वादीनाम्, षण्णां = षट्संख्याकानाम्, सोदराणाम् = भ्रातृणां,ज्येष्ठः = सर्वप्रथमः, जगद्विदितः = संसारप्रसिद्धः, हंसः नाम = एतन्नामकः ,गन्धर्वः = देवगायकः, पुत्रः आसीत् । तास्मिन् पूर्वोक्ते द्वितीये गन्धर्ववंशे, गन्धर्वराजेन चित्ररथेन , अभिसिक्तः = अभिषेकीकृतः, बाले एव = बाल्यकाले एव, राज्यपदम् आसादितवान् = प्राप्तवान् । अपरिमितगन्धर्वबलपरिवारस्य = देवगायकसेनापरिवारस्य। सः गिरिः = पर्वतः , एव अधिवासः = वासभूमिः।*

*पूर्वोक्तं सोममयूखसम्भवम् = चन्द्रकिरणेभ्यः जातम्, अप्सरसां कुलम् = अप्सरसां वंशम्। तस्मात् वंशात् किरणजालानुसारगलितेन = किरणजालस्य रश्मिसमूहस्यानुसारेण क्षरितेन, सकलेन एव = समग्रेणैव, रजनिकरकलाकलापलावण्येन = रजनिकरस्य चन्द्रमसः कलासमूहस्य,लावण्येन = सौन्दर्येण, निर्मिता इव, त्रिभुवननयनाभिरामा = त्रिलोकस्य नेत्रानन्दकारिणी , भगवती = ऐश्वर्यशालिनी द्वितीया इव, गौरीतिनाम, हिमकरकिरणावदातवर्णा = चन्द्रमसः रश्मिवत् गौरः वर्णः यस्याः सा, कन्यका = पुत्री, प्रसूता = जाता, तां पूर्वोक्तां कन्यकां , द्वितीयगन्धर्वकुलाधिपतिः = अपरगन्धर्वकुलराजः, हंसः, क्षीरसागरः गङ्गाम् इव, प्रणयिनीम् = पत्नीम्, अकरोत्, सा तु भगवता श्रीमता मकरकेतुना = कामदेवेन, रतिः इव = कामपत्नीव, शरत्समयेन = शरत्कालेन, कमलिनीव = पद्मिनीव हंसेन संयोजिता = संगमिता ,*

*सदृशसमागमोपजनिताम् = अनुरूपेण सम्मेलनेन जाताम्, अतिमहतीम् = गरीयसीम्, मुदम् = आनन्दम्, उपगतवती = प्राप्तवती, सा गौरी तस्य हंसस्य, निखिलान्तपुरस्वामिनी = निखिलानां सकलानाम् अन्तपुरवासिनां सुन्दरीणां स्वामिनी च अभवत्। तयोश्च महात्मनोः = विशालहृदययोः , ईदृशी = एवंभूता , विगतलक्षणा = शुभचिह्नरहिता, एकैवात्मजा = एकमात्रकन्यका अहम्, अनेकसहस्रदुःखभाजनम् = बहुप्रकारं क्लेशसमूहं तस्य पात्रम्, केवलं शोकाय = शोकहेतवे,समुत्पन्ना = संजाता।*

*भावार्थः-*

*अरिष्टायाः तुम्बुर्वादीनां षट्संख्याकानां भ्रातॄणां ज्येष्ठः संसारप्रसिद्धः हंसः नाम देवगायकः। तस्मिन् द्वितीये गन्धर्ववंशे गन्धर्वराजेन चित्ररथेन अभिषेकीकृतः बाल्यकाले एव साम्राज्यत्वं प्राप्तवान्। अगणितगन्धर्वबलपरिवारस्य हंसस्य अपि सः एव पर्वतः निवासस्थानम् अभवत् ।*

*यत्तु तत् चन्द्रकिरणेभ्यो जातम् अप्सरसां वंशं तस्मात् किरणजालानुसारगलितेन सकलेन समग्रेण चन्द्रमसः कलासमूहस्य सौन्दर्येण निर्मिता इव त्रिलोकस्य नेत्रानन्दकारिणी भगवती अपरा गौरी इव गौरी इति नाम्ना चन्द्रमसः रश्मिवत् गौरवर्णा कन्यका प्रसूता तां गौरीं द्वितीयगन्धर्वकुलाधिपतिः हंसः , दुग्धसमुद्रः मन्दाकिनीम् इव पत्नीं कृतवान्। सा तु भगवता कामदेवेन रतिः इव शरत्कालेन पद्मिनी इव हंसेन सङ्गमिता सदृशसमागमोपजनितां गरीयम् आनन्दं प्राप्तवती। सा गौरी हंसस्य निखिलानां अन्तःपुराणां तत्रस्थसुन्दरीणां मुख्या च जाता। तादृशयोः विशालहृदययोः गौरीहंसयोः एवंभूताशुभचिह्ना एकमात्रकन्यका अनेकसहस्रदुःखभाजनं शोकहेतवे सञ्जाता ।*

**पदच्छेदः**

| | | | | |
|---|---|---|---|---|
| गन्धर्वाणान्तु | - | गन्धर्वाणां | + | तु । |
| षोडश चित्ररथः | - | षोडशः | + | चित्ररथः । |
| इतश्च | - | इतः | + | च । |
| परिपालितान्यनेकानि | - | परिपालितानि | + | अनेकानि। |
| अरिष्टायास्तु | - | अरिष्टायाः | + | तु। |
| स एव | - | सः | + | एव । |

## पठनप्रवर्तनानि

**गद्यकाव्यं पठित्वा अधो दत्तपदानां समानार्थकपदानि लिखतु।**

**(प्रभृति , अभिनिवेशः, समुत्पन्नम्, प्रसूतम्, निष्पतितम् ।)**

**श्रद्धेयाः अंशाः**

अर्थग्रहणम् ।

उचितपदज्ञानम्।

आशयावबोधः

**पाठं पठित्वा महाश्वेतायाः उत्पत्तिकथां स्ववाक्यैः लिखतु।**

**श्रद्धेयाः अंशाः -**

आशयग्रहणम्।

क्रमानुगतत्वम्।

उचिता भाषा।

**“ गद्यं कवीनां निकषं वदन्ति ” । चर्चां कृत्वा टिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः -**


चर्चा ।

टिप्पणीलेखनम्।

वाक्यघटना ।

पाठः - ३

# ।। अभिषेकालोचना ।।



## आमुखम्

गद्यपद्यमयं साहित्यविभागं चम्पूकाव्यमित्यभिधीयते। चम्पूकाव्येषु प्रसिद्धमस्ति रामायणचम्पू। भोजराजेन विरचितस्य चम्पूरामायणस्य अयोध्याकाण्डाद् उद्धृते अस्मिन् पाठभागे रामाभिषेकस्य प्रारंभः वर्ण्यते। कोसलाधिपो राजा दशरथः सुमन्त्रप्रमुखान् अमात्यान् तथा पौरप्रमुखान् च आहूय रामाभिषेकमधिकृत्य व्यजिज्ञपत् । सर्वे प्रजाः तत् श्रुत्वा सन्तुष्टाः अभवन् । तदेव पाठस्य अस्य सन्दर्भः ।

**तदनन्तरम् असौ संमन्त्र्य मन्त्रिभिः सह पौरवृद्धान् वृद्धश्रवःपुरोधःसमान् समाहूय समादिदेश।**

**पदार्थः-** *तदनन्तरम् = रामाभिषेकनिश्चयानन्तरम्, असौ = दशरथः, संमन्त्र्य = चर्चां कृत्वा, मन्त्रिभिः सह = अमात्यैः सह, पौरवृद्धान् = पौरप्रमुखान्, वृद्धश्रवः = इन्द्रः, पुरोधः समान् = पुरोहित समान्, (अर्थात् बृहस्पतिसमान्) समाहूय = आमन्त्र्य, समादिदेश = निर्दिदेश।*

**सारांशः -** रामाभिषेकं कर्तुमिच्छन् दशरथः बृहस्पतिसमान् सर्वान् पौरप्रमुखान् आमन्त्र्य एवमुवाच।

**" विदितमेव हि भवतां शिवतातिमेव मतिं दधानाः सुपथा सञ्चरमाणा प्राणिनां दयमानमानसा मानधनाः यशस्समार्जनजागरूकाः जनोपतापसमार्जनतत्पराः पराः निर्वृतिम् उपेत्य देवभूयं गताः सर्वे नः पूर्वपुरुषा इति।**

**पदार्थः-** *भवतां विदितमेव = भवन्तः जानन्ति एव, शिवतातिं = मंगलकारिणीं, मतिं = बुद्धिं, दधानाः = धारयन्तः, सुपथा = सन्मार्गेण, सञ्चरमाणाः = प्रवर्तमानाः, प्राणिनां = जीविनां, दयमानमनाः = दयापूर्णहृदयाः, मानधनाः = अभिमानशालिनः, यशस्समार्जनजागरूकाः = यशसमार्जनतत्पराः, परां निर्वृतिं = परमानन्दं, उपेत्य = प्राप्य, देवभूयं गताः = देवलोकं गताः (उपरताः इति यावत्), नः = अस्माकं, पूर्वपुरुषाः = पूर्वजाः*

**सारांशः -** *अस्माकं पूर्वजाः सर्वे लोकस्य मंगलं कृत्वा नीतिशास्त्रानुसारं राष्ट्रं परिपाल्य सकलजातिषु दयां कामयमानाः यशस्समार्जने तत्पराः परमानन्दमनुभूय देवत्वम् आप्तवन्तः इति भवन्तः जानन्ति खलु।*

**तस्मात् अस्माभिरपि तेषां मनीषाम् अनुसरमाणैः एतावन्तं कालं परिपालिताः किल सकलाः प्रजाः । प्रमाणमत्र परिपालनक्रियामिमां मदीयाम् अनुभवन्तः ननु भवन्त एव । भवताम् अभ्युपगमानां निगमानां प्रतीपगामिनीं पदवीं न प्रत्येति खलु। लोकस्तदस्ति किञ्चित् अभ्यर्थनीयम्।**

**पदार्थः-** *तस्मात् = पूर्विकाणाम् आचारानुसारम्, अस्माभिरपि = मयापि (पूजार्थे बहुवचनम्), तेषां = पूर्विकाणाम्, मनीषां = बुद्धिम्, अनुसरमाणैः = आचारद्भिः सकलाः प्रजाः = समस्ताः पौराः,*

*परिपालिताः= रक्षिताः,अत्र =अस्मिन् विषये, इमां = प्रवर्तमानां, मदीयां = मामकीनां, परिपालनक्रियां = प्रजापालनकृत्यं, अनुभवन्तः = अवगच्छन्तः, भवन्तः एव = प्रजाः एव, प्रमाणं =साक्षिणः ,भवताम् = युष्माकम्, अभ्युपगमानां =अङ्गीकाराणाम्, निगमानां =नीतिशास्त्राणाम्, प्रतीपगामिनीं =प्रतिकूलवर्तनीम्, पदवीं =मार्गम्, लोकः =जनाः, न प्रत्येति =न अनुवर्तते, खलु। तत् =तस्मात् कारणात्, किञ्चित् = अल्पमात्रम् अभ्यर्थनीयम् अस्ति =वक्तव्यमस्ति।*

**सारांशः -** पूर्विकाणाम् आचारपद्धतिम् अनुसृत्यैव एतावत् कालपर्यन्तम् अस्माभिः सकलाः प्रजाः परिपालिताः किल। अस्मिन् मदुक्ते विषये मया परिपालिताः भक्ताः एव साक्षिणः ननु । यूयमपि नीतिशास्त्राणां प्रतिकूलवर्तिनीं पदवीं इतःपर्यन्तं न अनुवर्तन्ते स्म । अतः किञ्चित् युष्मान् अभ्यर्थनीयम् अस्ति ।

**मम सुरनरगीतख्यातिभिर्हेतिभिर्वा**
**दिवि भुवि च समानप्रक्रमैर्विक्रमैर्वा।**
**नियतमपरिहार्या या जरा सा मदङ्गे**
**विकचकमलषण्डे चन्द्रिकेवाविरासीत् ।।**

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| *सुरनरगीतख्यातिभिः* | *देवमानुषाणां स्तुतिभिः* |
| *हेतिभिः दिवि भुवि* | *शास्त्रैः स्वर्गे भूलोके* |
| *समानप्रक्रमैः* | *समानानुपातैः* |
| *विक्रमैः नियतं* | *पराक्रमैः निश्चितं* |
| *अपरिहार्या या जरा* | *दूरीकर्तुं असमर्थं यत् वार्द्धक्यम्* |
| *सा मदङ्गे विकचकमलषण्डे* | *मम शरीरे विकसितकमलसमूहे (पद्मम् )* |
| *चान्द्रिका इव आविरासीत् ।* | *जोत्स्ना इव आविरभूत् ।* |

**सारांशः -** *देवमानुषाणां स्तुतिगीतेन शास्त्रेण असामान्येन पराक्रमेण च दूरीकर्तुं अशक्ता या जरा अस्ति, सा जरा मम शरीरे विकसितकमलसमूहे चन्द्रिका इव आविर्बभूव (आविरासीत्) ।*

**वृत्तम्** - मालिनी

**तस्मात् समस्तक्षत्रवर्गगर्वपाटनवरिष्ठधाराधरपरश्वधभरणभीषणवेषभार्गवभङ्गाद् अपरिच्छिन्नतरशौर्यशालिनि सौजन्यभाजने जनानुरागनिलये निर्मत्सरे वत्सले वत्से अस्मिन् विश्वम्भराभारं चिरकालधार्यमाणम् आर्यैरनुमतः सन् अवतार्य विश्रान्तिसुखम् अनुभवितुम् अभिलषामि " इति ।**

**पदार्थः-** *तस्मात् =जराविर्भावात् , समस्तक्षत्रवर्गस्य =सकलक्षत्रियसमूहस्य, गर्वपाटने =दर्पनाशने, वरिष्ठम् =श्रेष्ठम्, परश्वधं =परशु नाम आयुधं, कुठारं इति यावत् तस्य भरणेन =धारणेन , भीषणवेषः =भयङ्कराकृतिः, भार्गवगर्वभंगात् =परशुरामस्य अहङ्कारनाशाद्, अपरिच्छिन्नतरशौर्यशालिनि= अपरिमितपराक्रमशालिनि, सौजन्यभाजने =स्नेहपात्रे, जनानुरागनिलये =जनानाम् अनुरागस्य पात्रीभूते, निर्मत्सरे =मत्सररहिते, वत्सले =वात्सल्यभाजने, अस्मिन् वत्से =मदीयपुत्रे, विश्वंभराभारं =भूभारम्, आर्यैः =भवद्भिः, अनुमतः सन् =अनुज्ञातः सन्, अवतार्य =निक्षिप्य, विश्रान्तिसुखम् =विश्रमसुखम्, अनुभवितुम् =अनुभोक्तुम्, अभिलषामि =इच्छामि।*

**सारांशः -** *मम शरीरे जरा आविरभूत्। भीषणाकारस्य परशुरामस्य गर्वभङ्गेन पराक्रमशालिनि जनानां अनुरागविषये स्नेहभाजने मत्सररहिते मम पुत्रे श्रीरामे भूभारं भवताम् अनुमत्या निक्षिप्य विश्रमसुखमनुभवितुम् अभिलषामि ।*

**ततः प्रावृषेण्यपयोवाहव्यूहस्तनितनादाकर्णनसमुदीर्णनिरतिशयाह्लादसंसर्गनिरर्गलनिर्गल-केकालापिनः कलापिनः इव जनाः प्रमदभवकलकलरवमुखरितहरिन्मुखाः बभूवुः।**

**पदार्थः-** *ततः =अनन्तरं, प्रावृषेण्यपयोवाहव्यूहः =वर्षाकालमेघसमूहम्, स्तनितनादः =गर्जितध्वनिः, तस्य ,आकर्णनेन = श्रवणेन, समुदीर्णः= समुत्पन्नः, निरतिशयम् =समधिकम्, आह्लादः =आनन्दः, तस्य संसर्गेण = सम्बन्धेन, निरर्गलम् =अविच्छिन्नम्, निर्गलन्ति =निर्गच्छन्ति, केकालापिनः = मयूराः(इव), जनाः =प्रजाः, प्रमदेन =सन्तोषेण, कलकलरवमुखरितहरिन्मुखाः =कलकलरवेणमुखरिताः दिङ्मुखाः बभूवुः=अभवन् ।*

**सारांशः -** *दशरथस्य वचनानुसृत्य वर्षकाले मेघगर्जनं श्रुत्वा केकारवं कुर्वन्तः मयूराः इव प्रमुदिताः जनाः हर्षारवैः दिङ्मुखानि पुरितानि ।*

**आनन्दबाष्पविसरो वदने प्रजानाम्**
**आविर्बभूव मकरन्द इवारविन्दे ।**
**रामस्य कान्तिमभिषेकदिने भवित्रीं**
**प्रक्षाल्य चक्षुरिव वीक्षितुमादरेण।।**

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| *अरविन्दे* | *कमले* |
| *मकरन्द इव* | *पुष्परस इव* |
| *प्रजानां* | *जनानां* |
| *वदने* | *मुखे* |
| *आनन्दबाष्पविसरः* | *आनन्दाश्रूपूरः* |
| *अभिषेकदिने* | *रामाभिषेकवेलायां* |
| *भवित्रीं* | *भाविनीं* |
| *रामस्य* | *श्रीरामचन्द्रस्य* |
| *कान्तिं* | *शोभाम्* |
| *चक्षुः प्रक्षाल्य* | *नेत्राणि प्रमार्ज्य* |
| *आदरेण वीक्षितुं* | *स्नेहेन द्रष्टुं* |
| *इव आविर्बभूव* | *प्रादुरासीत्* |

**सारांशः -** *प्रत्यासन्ने दिने रामाभिषेककान्तिम् अत्यादरेण द्रष्टुं नयनानि पौरजनाः प्रक्षालयन्तः इव तेषां वदनारविन्देभ्यः (अरविन्दमकरन्द इव) आनन्दबाष्पाणि बभूवुः ।*

**वृत्तम्** - वसन्ततिलकम् ।

**राजापि तेषां सम्पत्स्यमानमहोत्सवोत्सुकजनसम्मर्दजनिष्यमाणरजोराजिपातपरिजिहिर्षया इव रोमाञ्चप्रपञ्चेन कञ्चुकिताङ्गानां प्रमाणातीतां प्रीतिं प्रपन्नानां हर्षप्रकर्षेण द्विगुणीकृतमानन्दम् अन्तर्नियम्य सुमन्त्रप्रमुखान् मन्त्रिमुख्यान् एवम् आचख्यौ ।**

**पदार्थः-** *राजा = दशरथः , सम्पत्स्यमानेन = संभविष्यमाणेन , महोत्सवेन = राज्याभिषेकेण, उत्सुकानां आह्लादभरितानां, जनानां = पौराणाम्, सम्मर्देन = संक्षोभेण , जनिष्यमाणः = उत्पत्स्यमानः, रजोराजिपातः = धूलिराशिपतनस्य,परिजिहीर्षया इव = परिहारेच्छया इव, रोमाञ्चप्रपञ्चेन = रोमहर्षण प्रसारेण , कञ्चुकिताङ्गानां = आच्छादितावयवानां, प्रमाणातीताम् = अपरिमिताम्, प्रीतिं = हर्षं प्रपन्नानां प्राप्तवतां तेषां = जननां हर्षप्रकर्षेण = आनन्दाधिक्येन द्विगुणीकृतं = द्विगुणभावं प्रापितं, आनन्दं = सन्तोषम् , अन्तर्नियम्य = हृदये निरुद्ध्य , सुमन्त्रप्रमुखान् = सुमुन्त्रादीन् , मन्त्रिमुख्यान् = सचिवश्रेष्ठान् , एवं = वक्ष्यमाणप्रकारेण, आचख्यौ = उवाच।*

**सारांशः -** *रामाभिषेकवार्तां श्रुत्वा परितुष्टानां पौरजनानां पादाघातैः उत्पन्नाभिः रजोराजिभिः आच्छादितशरीरान् सुमन्त्रप्रमुखान् अमात्यान् द्विगुणीकृतानन्दान् कृत्वा दशरथः एवमुवाच ।*

**अस्माननाश्रिततपोवनभूमिभागान्**

**उन्मुच्यमार्गपरिपालनजागरूकान्।**

**अम्लानमौग्ध्यमचिरादवलम्ब्य राम-**

**मेवंविधः कथमुदेति जनानुरागः।।**

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अनाश्रिततपोवनभूमिभागान् | वानप्रस्थाश्रमम् अस्वीकृतवतः |
| मार्गपरिपालनजागरूकान् | नीतिमार्गेण प्रजानां परिपलने दत्तश्रद्धान् |
| अस्मान् | नः (दशरथम् इति यावत्) |
| उन्मुच्य | परित्यज्य |
| अम्लानमौग्ध्यम् | मुग्धभावेन शोभितम् |

| | |
|---|---|
| रामम् | श्रीरामम् |
| अवलम्ब्य | आश्रित्य |
| अचिरात् | क्षणात् |
| एवंविधः | एतादृशः |
| जनानुरागः | प्रजानाम् अत्यन्तानुरागः |
| कथम् | केन प्रकारेण |
| उदेति | उत्पन्नः भवति । |

**सारांशः -** अनाश्रितवानप्रस्थाश्रमं शास्त्रानुसारं प्रजापरिपालने दत्तश्रद्धं मां परित्यज्य अनतिरिक्तं मुग्धभावं (अनतिरिक्तकौमारं ) रामम् आश्रित्य एवंविधः जनानुरागः कथं उत्पद्यते।

**वृत्तम्** - वसन्ततिलकम्

**ते नियमितनिजमनोरथाय दशरथाय सविनयम् एवं व्यजिज्ञपन्।**

**पदार्थः-** ते = पौरप्रमुखाः, नियमितम् = निश्चितम् ,मनोरथम् = चित्ताभिलाषम्, व्यजिज्ञपन् विज्ञापयन्ति स्म।

**सारांशः -** दशरथवाक्यमाकर्ण्य पौरप्रमुखाः मनोभिलाषं प्रख्यापितवन्तं दशरथम् एवं सादरमवोचन्।

**देवे स्थितेऽपि तनयं तव रामभद्रं**
**लोकः स्वयं भजतु नाम किमत्र चित्रम् ।**
**चन्द्रं विना यदुपलम्भनहेतुभूतम्**
**क्षीरोदमाश्रयति किम् तृषितश्चकोरः ।।**

| अन्वयः | अन्वयार्थः |
|---|---|
| *देवे स्थिते* | *महाराजे जीवति (सति)* |
| *तव तनयम्* | *भवतः पुत्रम्* |

| | |
|---|---|
| *रामभद्रम्* | *श्रीरामचन्द्रम्* |
| *लोकः* | *जनः* |
| *स्वयम् भजतु नाम* | *आत्मना आश्रयतु इत्यत्र* |
| *किमत्र चित्रम्* | *किमाश्चर्यम् ?* |
| तृषितः | पिपासितः |
| चकोरः | चकोरनाम पक्षिविशेषः |
| चन्द्रं विना | इन्दुं विना |
| तदुपलम्भनहेतुभूतम् | तस्य चन्द्रस्य उत्पत्तौ कारणभूतम् |
| क्षीरोदम् | क्षीरसागरम् |
| किम् | कथम् |
| आश्रयति | सेवते। |

**सारांशः -** *प्रजापालनतत्परःभवान् यथायोग्यं शासति। तथापि प्रजाः स्वयं बालकमपि रामचन्द्रम् आश्रयन्तु।इत्यत्र किमप्याश्चर्यं नास्ति। यतः पिपासवः चकोराः चन्द्रं विना चन्द्रस्य उत्पत्तौ कारणभूतं क्षीरसागरं नाश्रयन्ति।*

**वृत्तम्** - वसन्ततिलकम्

**तदनन्तरं तत्वरे तत्वराः तत्वविदां वरिष्टस्य वसिष्ठस्य शासनाद् अभिषेकोपकरणाहरणाय सामात्याः पौरवर्गाः ।।**

**पदार्थः-** तदनन्तरम् =सुमन्त्रादीनां प्रत्युत्तरानन्तरम्, तत्वविदां वरिष्ठस्य = तत्वज्ञानिनां श्रेष्ठस्य ,वसिष्ठस्य =महर्षेः वसिष्ठस्य, शासनात् = निर्देशात् , अभिषेकोपकरणाहरणाय = अभिषेकसामग्रीणां सम्पादनाय, पौरवर्गः = सामात्यैर्युक्तः पौरजनाः, तत्वरे = त्वरां चकार ।

**सारांशः -** अनन्तरं तत्वज्ञानिनां प्रमुखस्य वसिष्ठस्य निर्देशानुसारं सर्वे अमात्यैः सह पौरजनाः अभिषेकसामग्रीणां शेखरणार्थं सत्वरं परिश्रमं कृतवन्तः।

**पदच्छेदाः-**

| | | | | |
|---|---|---|---|---|
| अस्माभिरपि | - | अस्मभिः | + | अपि । |
| लोकस्तदस्तु | - | लोकः | + | तत् + अस्तु । |
| किञ्चिदभ्यर्थनीयम् | - | किञ्चित् | + | अभ्यर्थनीयम् । |
| समानप्रक्रमैर्विक्रमैर्वा | - | समानप्रक्रमैः | + | विक्रमैः + वा |
| चन्द्रिकेवाविरासीत् | - | चन्द्रिका | + | इव + आविरासीत् । |
| सन्नवतार्य | - | सन् | + | अवतार्य । |
| कलापिना इव | - | कलापिनः | + | इव। |
| इवारविन्दे | - | इव | + | अरविन्दे। |
| चक्षुरिव | - | चक्षुः | + | इव। |
| राजापि | - | राजा | + | अपि। |
| मन्त्रिमुख्यानेवमाचख्यौ | - | मनत्रिमुख्यान् | + | एवमाचख्यौ। |
| तेऽपि | - | ते | + | अपि। |
| तत्परस्तत्वविदाम् | - | तत्परः | + | तत्वविदाम् |

**क्रियापदानि -**

| | | |
|---|---|---|
| आदिदेश | - | आङ् + दिश अतिसर्जने पर. लिट् प्र. पु. ए । |
| आविरासीत् | - | आविस् + अस भुवि पर. लङ् प्र. पु. ए । |
| अभिलषामि | - | अभि + लष कान्तौ पर. लट् उ. पु. ए । |
| अभवन् | - | भूसत्तायां पर. लङ् प्र. पु. ब .व। |
| आविर्बभूव | - | आविस् + भूसत्तायां पर. लिट् प्र. पु. ए । |
| आश्रयति | - | आङ् + श्रिञ् सेवायां पर. लट् प्र. पु. ए । |
| व्यजिज्ञपन् | - | वि + ज्ञा अवबोधने णिचि पर. लङ् प्र. पु. ब.व। |

**कोशः-**

| | | |
|---|---|---|
| बुद्धिः | - | बुद्धिर्मनीषाधिषणा धीः प्रज्ञा शेमुषी मतिः। |
| लोकः | - | लोकस्तु भुवने जने... |
| भूः | - | भूर्भूमिरचलानन्तारसाविश्वम्भराधरा । |
| मयूरः | - | मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् |
| चन्द्रिका | - | चन्द्रिकाकौमुदीज्योत्स्ना । |
| रोमाञ्चः | - | रोमाञ्चोरोमहर्षणम्। |
| तनयः | - | आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी । |

### विग्रहवाक्यानि-

| | | |
|---|---|---|
| पौरवृद्धाः | - | पुरेभवाः पौराः, पौराश्च ते वृद्धाः । |
| सुपथा | - | शोभनः पन्थाः, तेन । |
| मानधनाः | - | मानं धनं येषां ते । |
| यशस्समार्जनजागरूकाः | - | यशसः समार्जनं, तस्मिन् जागरूकाः ये ते । |
| मदीया | - | मम इयम् |
| सौजन्यभाजने | - | सुजनस्य भावः सौजन्यम् , सौजन्यमेव भाजनं तस्मिन् । |
| विश्वम्भराभारम् | - | विश्वं बिभर्त्ति इति विश्वम्भरा तस्याः भारम् । |
| अम्लानमौग्ध्यम् | - | मुग्धस्य भावः मौग्ध्यम् । न म्लानं अम्लानम्। अम्लानं मुग्धभावं यस्य तम् । |
| परिपालनजागरूकान् | - | परिपालने जागरूकाः तान् । |

## पठनप्रवर्तनानि

**पाठभागं पठित्वा रामाभिषेकालोचनाम् अधिकृत्य स्ववाक्यैर्लिखतु ।**

**श्रद्धेयाः अंशाः-**

आशयग्रहणम् ।
वाक्यघटना ।
लेखनसामर्थ्यम् ।

**पाठभागं पठित्वा श्लोकानाम् आशयं स्ववाक्यैर्लिखतु ।**

**श्रद्धेयाः अंशाः-**

आशयावबोधः।
लेखनसामर्थ्यम् ।
भाषाशुद्धिः।

**अधो दत्तानां श्लोकानां वृत्तं निर्णयतु।**

**१ . मम सुरनरगीतख्यातिभिर्हेतिभिर्वा**
**दिवि भुवि च समानप्रक्रमैर्विक्रमैर्वा।**

**२ . आनन्दबाष्पविशरो वदने प्रजानाम्**
**आविर्बभूव मकरन्द इवारविन्दे ।**

**श्रद्धेयाः अंशाः-**

लघुगुरुविवेचनम् ।
वृत्तज्ञानम्।
लक्षणसमन्वयः।

**पाठभागं पठित्वा चम्पूप्रभाषणरूपेण कक्ष्यायाम् अवतारयतु ।**

**श्रद्धेयाः अंशाः-**

अवतारणसामर्थ्यम्।
उचिता शैली।
भाषाप्रयोगः ।

**चम्पूकाव्यानाम् कवीनां च नामानि सञ्चित्य लिखतु ।**

**श्रद्धेयाः अंशाः-**

काव्यविवेचनम्।
सञ्चयनसामर्थ्यम्।
कवीनां काव्यानां च नामानि।

# ।। चित्रम् ।।

[redacted]

पठनाधिगमाः

श्लोकान् पठित्वा अलङ्कारान् लक्ष्यलक्षणपूर्वं विवेचयति।

श्लोकान् पठित्वा अलङ्कारान् निर्णयति।

वृत्तं निर्णयति।

वृत्तानुसारम् आलपति।

समानवृत्तश्लोकानां चयनम् करोति।

पाठः - ४

# ।। वृत्तपरिचयः ।।

**आमुखम्**

वृत्तं नाम छन्दोबद्धः । प्रायेण काव्यानि पद्यनिबद्धानि दृश्यन्ते । पद्यानि वृत्तबद्धानि च । पद्यरचनार्थं वृत्तानां तालक्रममावश्यकम्। वृत्तानाम् समवृत्तम् , अर्धसमवृत्तम् , विषमवृत्तम् इति त्रैविध्यं वर्तते। अत्र रथोद्धता-मन्दाक्रान्ता- शिखरिणी- शार्दूलविक्रीडितम्-स्रग्धरा इति पञ्च समवृत्तानि निवशितानि।

**भूतसंख्या**

वृत्तशास्त्रे यतेः निर्णयार्थं भूतसंख्या उपयुज्यते।

यथाः-

| | | |
|---|---|---|
| रसः | - | षट् । |
| शैलः | - | सप्त । |
| मुनिः | - | सप्त । |
| भोगिः | - | अष्ट (सर्पः) । |
| लोकः | - | सप्त। |
| वसु | - | अष्ट । |
| रुद्रः | - | एकादशः । |

## मन्दाक्रान्ता ।

**मन्दाक्रान्ताम्बुधिरसनगैर्मोभनौ तौगयुग्मम्।**

यस्मिन् पद्ये प्रतिपादं मगण भगण नगण तगण तगणाः गुरुद्वयं च यथाक्रमं भवन्ति चेत् मन्दाक्रान्ता नाम वृत्तं भवेत्। अत्र चतुर्भिः (चतुर्थे वर्णे) षड्भिः (दशमे वर्णे) सप्तभिश्च (सप्तदशे) वर्णे यतिः। अत्र प्रतिपादं सप्तदश वर्णाः भवन्ति।

उदा :-

मगणः भगणः नगणः तगणः तगणः गुरुः गुरुः
- - - - UU UUU - - U - - U - -
कश्चित्का/न्ता विर/हगुरु/णा स्वाधि/कारात् प्र/मत्तः
शापेनास्तं गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनया स्नानपुण्योदकेषु
स्निग्धच्छायातरुषुवसतिं रामगिर्याश्रमेषु।।

अस्मिन् श्लोके प्रतिपादं मगण-भगण-नगण-तगण-तगणाः गुरुद्वयं च यथाक्रमं भवन्ति। अत्र चतुर्भिः तदनन्तरं षड्भिः ततः सप्तभिश्च यतिः । अतः मन्दाक्रान्ता भवति । प्रायेण सन्देशकाव्येषु इमं वृत्तं प्रयुज्यते ।

## शिखरिणी

**रसैरुद्रैच्छिन्ना यमनसभलागः शिखरिणी ।**

यस्मिन् पद्ये प्रतिपादं यगण मगण नगण सगण भगणाः लघुः गुरुश्च यथाक्रमं भवन्ति चेत् शिखरिणी नाम वृत्तं भवति। अत्र प्रतिपादं षड्भिः ततः एकादशभिश्च वर्णैः यतिः। अत्र प्रतिपादं सप्तदश वर्णाः भवन्ति।

उदा :-

यगणः मगणः नगणः सगणः भगणः ल गु
U - - - - - U U U U U - - U U U -
मुनिप्रौ/ढारूढा/ जगति/खलुगू/ढात्मग/तयो
भवत्पादाम्भोजस्मरणविरुजो नारदमुखाः।
चरन्तीश स्वैरंसततपरिनिर्भातपरचित्
सदामन्दाद्वैत प्रसरपरिमग्नाः किमपरम्।।

अस्मिन् श्लोके प्रतिपादं यगण-मगण-नगण-सगण-भगणाः लघुः गुरुः च यथाक्रमं भवन्ति। अत्र षड्भिः ततः एकादशभिश्च यतिः। अतः अत्र शिखरिणी नाम वृत्तं भवति।

## शार्दूलविक्रीडितम्

**सूर्याश्वैर्मसजास्तताः सगुरवः शार्दूलविक्रीडितम् ।**

यस्मिन् पद्ये प्रतिपादं मगण - सगण - जगण - सगण - तगण-तगणाः गुरुश्च यथाक्रमं भवन्ति चेत् शार्दूलविक्रीडितं नाम वृत्तं भवति। अत्र द्वादशभिः ततः सप्तभिश्च वर्णैः यतिः (सूर्याः द्वादश, अश्वाः सप्त)

उदा :-

| मगणः | सगणः | जगणः | सगणः | तगणः | तगणः | गुरुः |
|---|---|---|---|---|---|---|
| - - - | U U - | U - U | U U - | - - U | - - U | - |

सूर्यस्प/र्धिकिरी/टमूर्ध्व/तिलक/प्रोद्भासि/फालान्त/रम्
कारुण्याकुलनेत्रमार्द्रहसितोल्लासं सुनासापुटम्।
गंडोद्यन्मकराभकुंडलयुगं कण्ठोज्ज्वलत्कौस्तुभम्
त्वद्रूपं वनमाल्यहारपटल श्रीवत्सदीप्रं भजे।।

अस्मिन् श्लोके प्रतिपादं मगण - सगण - जगण - सगण - तगण-तगणाः गुरुश्च यथाक्रमं भवन्ति। अतः शार्दूलविक्रीडितम् नाम वृत्तं भवति। अत्र द्वादशभिः ततः सप्तभिश्च वर्णैः यतिः।

## स्रग्धरा।

**म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।**

यस्मिन् पद्ये प्रतिपादं मगण - रगण - भगण - नगण - यगण - यगण - यगणाः च यथाक्रमं भवन्ति चेत् स्रग्धरा नाम वृत्तं भवति। अत्र सप्तभिः , ततः सप्तभिः (चतुर्दशे वर्णे) ततः सप्तभिश्च वर्णैः (एकविंशतितमे वर्णे) यतिः। अत्र प्रतिपादं एकविंशति वर्णाः भवन्ति। (त्रिमुनिः -त्रिवारं, मुनिः -सप्त ऋषयः)

उदा :-

मगणः रगणः भगणः नगणः यगणः यगणः यगणः
- - - - U - - U U UUU U - - U - - U - -
सान्द्रान/न्दावबो/धात्मक/मनुप/मितं का/लदेशा/वधिभ्याम्

निर्मुक्तं नित्यमुक्तं निगमशतसहस्रेण निर्भास्यमानम्।

अस्पष्टं दृष्टमात्रे पुनरुरुपुरुषार्थात्मकं ब्रह्मतत्वम्

तत्तावद्भाति साक्षाद्गुरुपवनपुरे हन्त! भाग्यं जनानाम्।।

अस्मिन् श्लोके प्रतिपादं मगण - रगण - भगण - नगण - यगण - यगण - यगणाः यथाक्रमं भवन्ति। अतः स्रग्धरा नाम वृत्तं भवति।

## रथोद्धता

**रान्नराविह रथोद्धता लगौ।**

यस्मिन् पद्ये प्रतिपादं रगण - नगण - रगणाः लघु गुरुश्च यथाक्रमं भवन्ति चेत् रथोद्धता नाम वृत्तं भवति।

उदा :-

रगणः नगणः रगणः ल गु
- U - U U U - U - U -
कौशिके/न स कि/ल क्षिती/श्वरो
राममध्वरविघातशान्तये ।
काकपक्षधरमप्ययाचित-
स्तेजसां हि न वयः समीक्ष्यते।।

अस्मिन् श्लोके प्रतिपादं रगण - नगण - रगणाः लघु गुरुश्च यथाक्रमं भवन्ति । अतः रथोद्धता नाम वृत्तं भवति। अत्र एकादश वर्णाः भवन्ति ।

## पठनप्रवर्तनानि।

▶ **वृत्तं लक्षणसहितं समर्थयतु ।**

**(क) मन्दाक्रान्ता (ख) रथोद्धता (ग) स्त्रग्धरा।**

श्रद्धेयाः अंशाः

लक्षणलेखनम्

वृत्तनिबद्धानां श्लोकानां चयनम्।
लक्षणसहितं समर्थनम् ।

▶ **प्रदत्तान् श्लोकान् पठित्वा लक्ष्यलक्षणसमन्वयपूर्वकं वृत्तानि निर्णयतु।**

(क) धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाः श्चेतनाचेतनेषु।।

(ख) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।

(ग) इदं विश्वंपाल्यं विधिवदभियुक्तेन मनसा
प्रियाशोको जीवं कुसुममिव धर्मो ग्लपयति।
स्वयं कृत्वा त्यागं विलप न विनोदोऽप्यसुलभः

तदद्याप्युच्छ्वासो भवित ननु लाभो हि रुदितम् ।।

**वृत्तानुसारं श्लोकान् सञ्चित्य तालानुसारं कक्ष्यायाम् आलपतु ।**

श्रद्धेयाः अंशाः

वृत्तज्ञानम् ।
गुरुलघूविवेचनम्।
तालबोधः।
आलपनसामर्थ्यम्।

# किमधिगतम्

निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

# ।। अलङ्कारः ।।

अलङ्कारेषु बालानां अवगाहनसिद्धये।
ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः।।

अलंक्रियते अनया इत्यलङ्कारः। प्राधान्येन अलङ्कारौ द्विधा। अर्थालङ्काराः , शब्दालङ्काराश्चेति।

पाठेऽस्मिन् अर्थान्तरन्यासः - काव्यलिङ्गम् - दृष्टान्तः - अप्रस्तुतप्रशंसा इति चत्वारो अर्थालङ्काराः , अनुप्रासालङ्कारः इति शब्दालङ्कारः च निवेशिताः।

## अर्थान्तरन्यासालङ्कारः

**उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः ।**

यत्र सामान्यस्य विशेषेण समर्थनं तथा विशेषस्य सामान्येन वा समर्थनम् तत्र अर्थान्तरन्यासः।

उदाः-

हनुमानब्धिमतरत् दुष्करं किं महात्मनाम् ।

अस्मिन् उदाहरणे हनुमान् अब्धिमतरद् इति विशेषः । महात्मनां असाध्यं किञ्चिदपि नास्ति इति सामान्येन विशेषसमर्थनत्वात् अर्थान्तरन्यासः।

## काव्यलिङ्गालङ्कारः

**समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम् ।**

समर्थनीयस्य अर्थस्य समर्थनमेव काव्यलिङ्गम् । हेतुना वाक्यं समर्थयति चेत् काव्यलिङ्गालङ्कारः।

उदाः-

जितोऽसि मन्द! कन्दर्प! मच्चित्तेऽस्ति त्रिलोचनः।

हे मन्द कन्दर्प ! त्वं मया जितोऽसि। यतः मम चित्ते त्रिलोचनः अस्ति। उदाहरणेऽस्मिन् कामजयस्य दुष्करत्वात् त्रिलोचनः मम अन्तःकरणे अस्ति इति त्रिलोचनस्य सन्निधानप्रदर्शनेन समर्थयते ।

## दृष्टान्तालङ्कारः

**चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलंकृतिः।**

उपमानोपमेययोः वाक्ययोः बिम्बप्रतिबिम्बत्वं भवति चेत् तत्र दृष्टान्तो नाम अलङ्कारः। भिन्नौ धर्मौ स्थितावपि पृथक् निर्दिष्टो चेत् तत्र दृष्टान्तालङ्कारः।

उदाः-

त्वमेव कीर्तिमान् राजन् ! विधुरेव हि कान्तिमान् ।

हे राजन् ! त्वमेव कीर्तिमान् इति उपमेयवाक्यम् । चन्द्र एव कान्तिमान् इति उपमान वाक्यम्। अत्र कीर्तिमत्व - कान्तिमत्वरूपौ धर्मौ बिम्बप्रतिबिम्बभावेन निर्दिष्टौ इति लक्षणसमन्वयः।

## अप्रस्तुतप्रशंसालङ्कारः

**अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया ।**

अप्रस्तुतस्य प्रशंसा (वर्णनम्) यत्र प्रस्तुताश्रया भवति सा अप्रस्तुतप्रशंसा ।

उदाः-

एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते।

शकुन्तेषु चातकः एव भाग्यवान् , यः शक्राद् (इन्द्रात्) अन्यं प्रभुं न याचते । अस्मिन् उदाहरणे औदार्यशालिनं राजानं विना अन्यं प्रभुं न प्रार्थये , इति प्रस्तुतस्य कार्यसूचनाय अप्रस्तुतस्य शकुन्तवृत्तान्तवर्णनया अप्रस्तुतप्रशंसालङ्कारः।

## अनुप्रासालङ्कारः (शब्दालङ्कारः)

### वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च ।

पादेषु पदेषु च वर्णावृत्तिः अनुप्रासः इत्यन्वयः। स्वरस्य साम्याभावेऽपि व्यञ्जनानां मनोरञ्जकरूपेण पादेषु पदेषु वा आवृत्तिः अभ्यासः अनुप्रासालङ्कारः ।

उदाः-

लताकुञ्जं गुञ्जन् मदवदलि पुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन्।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि।।

अत्र प्रथमपादे ' ञ्ज ' इति संयुक्ताक्षरस्य आवृत्तिः - कुञ्जं , गुञ्जन्, पुञ्जम् इति। द्वितीयपादे ' ङ्ग ' इति संयुक्ताक्षरस्य आवृत्तिः - आलिङ्ग, अङ्गम्, अनङ्गम् इति । तृतीयपादे ' न्द ' इति संयुक्ताक्षरस्य आवृत्तिः - मन्दम्, अरविन्दम्, इति । चतुर्थपादोऽपि 'न्द ' इति संयुक्ताक्षरस्य आवृत्तिः - वृन्द , विन्द, मकरन्द इति आवर्तनात् अनुप्रासालङ्कारः।

## पठनप्रवर्तनानि

**१) अधोदत्तान् अलङ्कारान् लक्ष्यलक्षणसमन्वयपूर्वकं लिखतु ।**

(क) काव्यलिङ्गालङ्कारः, (ख) दृष्टान्तालङ्कारः, (ग) अनुप्रासालङ्कारः

श्रद्धेयाः अंशाः -

अर्थग्रहणम् ।
अलङ्कारज्ञानम्।
लक्ष्यलक्षणसमर्थनम्।

**२) अधोदत्तानि पद्यानि पठित्वा चर्चां कृत्वा अलङ्कारं निर्णयतु ।**

**(क)** गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम्।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते।।

(ख) भस्मोद्दूलनभद्रमस्तु भवते रुद्राक्षमाले शुभे
हासोपानपरम्बरेगिरिसुताकान्तालयालङ्कृते।
अद्याराधनतोषितेन विभुना युष्मत् सपर्यासुखा
लोकोच्छेदिनि मोक्षभामिनिमहामोहे निलीयामहे।।

(ग) कामं नृपाः सन्ति सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिं।
नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैवरात्रिः।।

श्रद्धेयाः अंशाः -

अलङ्कारज्ञानम्।
लक्षणज्ञानम् ।
लक्ष्यलक्षणसमर्थनम्।

**३) पठितानां श्लोकानां मध्ये अर्थान्तरन्यासः , काव्यलिङ्गम् , अनुप्रासः इत्येत्षाम् अलङ्काराणां उदाहरणानि निर्धार्य लिखतु ।**

**श्रद्धेयाः अंशाः -**

उचितचयनम् ।
लक्षणावगतिः ।
समर्थनम्।

**३) अधोदत्तान् श्लोकान् पठित्वा चर्चां कृत्वा तत्रान्तर्गतानां उपमानोपमेयानां / वर्ण्यावर्ण्यानाम् /प्रस्तुताप्रस्तुतानाम् पट्टिकां रचयतु।**

१. त्वमेव कीर्तिमान् राजन् ! विधुरेव हि कान्तिमान् ।
२. एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते।
३. हनूमानब्धिमतरत् दुष्करं किं महात्मनाम् ।

| उपमानम् | उपमेयः |
|---|---|
| | |

**श्रद्धेयाः अंशाः -**

अलङ्कारज्ञानम्।
विवेचनसामर्थ्यम्।
उपमानोपमेयज्ञानम्।

# किमधिगतम्

निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

# एककम् ३

# शास्त्रम्

**आमुखम्**

शब्दार्थशरीरं काव्यम् । अपशब्दाः काव्यशरीरं दूषयन्ति। सुशब्दप्रयोगेण काव्यशरीरशोभां वर्धयितुं व्याकणज्ञानम् अपेक्षितम् इत्यतः अत्र व्याकरणांशः निवेशितः । भाषायाः मुख्यमेककं वाक्यम्। वाक्यं च कारकान्विता क्रिया । अतः कारकज्ञानं सम्पादयितुं कारकप्रकरणमत्र निवेशितम्। कर्ता , कर्म , करणम्, सम्प्रदानम्, अपादानम् , अधिकरणं चेति कारकाणि षट्।

## पठनाधिगमाः

- कारकप्रकरणस्थानां सूत्राणां पठनम् ।
- सूत्रस्य वृत्तिं वदति लिखति च।
- सूत्राणां सोदाहरणं व्याख्यानं वदति लिखति च ।
- कारकाणि विविच्य वक्येषु प्रयुङ्क्ते ।

# पाठः - ६

## कारकप्रकरणम्

### आमुखम्

आशयप्रकाशनमेव भाषाणां परमो धर्मः। लोके शब्दाः अपशब्दाः च प्रयुज्यन्ते। तत्र कः शब्दः कः अपशब्दः इति निर्णये व्याकरणज्ञानम् अवश्यंभावि। भारतेषु प्रसिद्धेषु संस्कृतव्याकरणग्रन्थेषु प्रथमस्थानमावहति पाणिनेः अष्टाध्यायी (पाणिनीयम् ) । तद् क्रोडीकृत्य श्रीमता भट्टोजिदीक्षितमहाशयेन विरचितं भवति ‘ वैयाकरणसिद्धान्तकौमुदी ’। इमामाधारीकृत्य अनेके ग्रन्थाः समुपलभ्यन्ते । तद्यथा व्याकरणे - सिद्धान्तकौमुदी , प्रौढमनोरमा , शब्दकौस्तुभः , वैयाकरणभूषणकारिका चेति ग्रन्थचतुष्टयम् । वैयाकरणसिद्धान्तकौमुदीतः स्वीकृतोऽयं भागः ।

‘करोति’ - क्रियां निर्वर्तयति इति कारकम् । क्रियाजनकं कारकमित्यर्थः । ‘कारकान्विता क्रिया वाक्यम्’ इत्यतः वाक्यार्थानां ग्रहणाय प्रयोगाय च करकं पठामः।

### १. प्रथमाविभक्तिः

**सूत्रम् - १** **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । २-३-४६**

प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात् । नियतोपस्थितिकाः प्रातिपदिकार्थाः । मात्राशब्दस्य प्रत्येकं योगः। अलिङ्गाः नियतलिङ्गाश्च प्रातिपदिकार्थमात्रे इत्यस्य उदाहरणानि सन्ति- उच्चैः, नीचैः, कृष्णः, श्रीः, ज्ञानम् । अनियतलिङ्गास्तु

लिङ्गमात्राधिक्यस्य- तटः, तटी, तटम्। परिमाणमत्रे - द्रोणो व्रीहिः। वचनं संख्या - एकः, द्वौ , बहवः ।

**टिप्पणिः -**

'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' - धातुं प्रत्ययं, प्रत्ययान्तं, च वर्जयित्वा अर्थवत् शब्दस्वरूपं भवति प्रातिपदिकम्। राम, लता, वृक्ष इत्यादयः । यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेन उपस्थितिः सः तदर्थः नियतोपस्थितिकः । रामः इत्युक्ते दाशरथिरामः ग्राह्यः । अलिङ्गाः अव्ययशब्दाः। कृष्णः वासुदेवपुत्रः कृष्णः । स च नियतपुँल्लिङ्गः । श्रीः - नियतस्त्रीलिङ्गः। ज्ञानम् - नियतनपुंसकलिङ्गः। अनियतलिङ्गाः इत्युक्ते प्रातिपदिकार्थेन सह लिङ्गम् अधिकतया बोधयितुं प्रथमाविभक्तिः उपयुज्यते इत्यर्थः ।

**सूत्रम् - २ सम्बोधने च । २-३-४७**

सम्बोधने च प्रथमा स्यात् । हे ! राम मां रक्षतु ।

**टिप्पणिः -**

अभिमुखीकृत्य ज्ञानं सम्बोधनम् । प्रातिपदिकार्थेन सह संम्बोधनेऽधिके गम्यमाने अपि प्रथमा स्यात् इति सूत्रार्थः। हे राम ! त्वं गच्छ । अत्र राम इति सम्बोधना भवति ।

## २. द्वितीयाविभक्तिः

**सूत्रम् -३ कर्तुरीप्सिततमं कर्म । १-४-४९**

कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् । अप्तुम् इष्टम् ईप्सितम् । अत्यन्तमीप्सितम् ईप्सिततमम्। रामः ओदनं भुङ्क्ते इत्यत्र इष्टतमः ओदनः । रामः पयसा ओदनं भुङ्क्ते इत्यत्र इष्टतमः ओदनः भवति । तेन तदेव कर्म। कर्तुः ईप्सिततमं कर्म इति पदच्छेदः । कर्तुः इति किम् ? माषेष्वश्वं बध्नाति इत्यत्र कर्तृपदस्याभावेन माषपदस्य न कर्मसंज्ञा ।

## सूत्रम् - ४ कर्मणि द्वितीया । २-३-२

अनभिहिते कर्मणि द्वितीया स्यात् । हरिं भजति । अभिहिते तु कर्मादौ प्रथमा एव । हरिः सेव्यते। लक्ष्म्या सेवितो हरिः। अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः । क्वचित् निपातेन अभिधानम् ।

### टिप्पणिः -

भक्तः हरिं भजति इति वाक्ये भक्तस्य भजनक्रियया प्राप्तुम् ईप्सिततमः हरिः । तेन हरिः कर्म । हरिः सेव्यते इत्यत्र 'ते' इति तिङ्प्रत्ययेन कर्म अभिहितम् । लक्ष्म्या सेवितः हरिः इति वाक्ये सेवितः इत्यस्य तः (क्त) इति कृत्प्रत्ययेन कर्म अभिहितम् ।

शत्यः (शतेन क्रीतः) अश्वः इत्यत्र 'य' इति तद्धितप्रत्ययेन कर्म अभिहितम्। प्राप्तम् उदकं यं सः प्राप्तोदको ग्रामः इत्यत्र बहुव्रीहिसमासेन कर्म अभिहितम् । तेन तत्र कर्मणि प्रथमैव। अवैमि चैनां अनघेति किन्तु लोकापवादो बलवान् मतोमे - अत्र 'इति' इति निपातेन अभिहितत्वात् अनघाशब्दात् प्रथमा ।

## सूत्रम् -५ अकथितञ्च । १-४-५१

अपादानादिविशेषैः अविवक्षितं कारकं कर्मसंज्ञं स्यात्। अकथितं च इति पदच्छेदः।

### वार्तिकम्

' दुह्याच्पच्दण्डरुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।

कर्मयुक्स्यादकथितम् तथा स्यान्नीहृकृष्वहाम् । । '

(दुह् - याच् - पच्- दण्ड् - रुधि- प्रच्छि - चि - ब्रू - शासु - जि - मथ् - मुषाम् । कर्मयुक्स्याद- अकथितं तथा स्यात् नी - हृ - कृष् - वहाम् ) ।

दुहादीनां द्वादशानां तथा नी प्रभृतीनां चतुर्णां च कर्मणा यद्युज्यते तदेव अकथितं कर्मेति परिगणनं कर्तव्यमित्यर्थः । अस्य प्रवृत्तिः यत्र भवति तत्र 'कर्त्तुरीप्सिततमं कर्म' इति सूत्रेण सिद्धं प्रधानं कर्म भवति । तादृशकर्मणा युक्तम् अपादनम्, सम्प्रदानम्, अधिकरणं वा

भवति। तत्र अपादानत्वेन अविवक्षायां कर्मसंज्ञा भवति । अनेन सूत्रेण यस्य कर्मसंज्ञा तद्‌गौणं कर्म इति उच्यते ।

एते द्विकर्मकाः धातवः

| **धातुः** | **क्रिया** | **उदाहरणम्** |
|---|---|---|
| दुह् | दोग्धि | रमणः गां दोग्धि पयः |
| पच् | पचति, पचते | माता तण्डुलान् ओदनं पचति। |
| याच् | याचते | वामनः बलिं याचते वसुधाम् |
| दण्ड | दण्डयति | न्यायाधिपः चोरान् शतं दण्डयति । |
| रुध् | रुणद्धि | अजयः शिशुं अवरुणद्धि गृहम् । |
| प्रच्छ् | पृच्छति | पथिकः रक्षिपुरुषं पन्थानं पृच्छति । |
| चिञ् | चिनोति | वानरः वृक्षम् अवचिनोति फलानि । |
| ब्रूञ् | ब्रूते | ऋषिः शिष्यं धर्मं ब्रूते शास्ति वा । |
| शासु | शास्ति | पिता पुत्रं धर्मं शास्ति । |
| जि | जयति | रामः शतं जयति खरम् । |
| मथ् | मथ्नाति | देवाः सुधां क्षीरनिधिं मथ्नाति। |
| मुष् | मुष्णाति | चोरः देवदत्तं शतं मुष्णाति। |
| णीञ् | नयति | राजीवः ग्रामम् अजां नयति । |
| हृञ् | हरति | राजेशः ग्रामम् अजं हरति । |
| कृष् | कर्षति | गोविन्दः ग्रामम् अजं कर्षति। |
| वह् | वहति | भटः ग्रामम् अश्वं वहति। |

अर्थनिबन्धनेयं संज्ञा । एतदर्थकधातवः अपि द्विकर्मकाः एव । यथा - भिक्षते, भाषते, वक्ति। उदाः- बलिं भिक्षते वसुधाम्। शिष्यं धर्मं भाषते । अभिधत्ते, वक्ति इत्यादि।

### टिप्पणिः -

कोसलराजपुत्रः त्वां कौशलं वचोऽब्रवीत् । वनौकसाम् अधिपः त्वां भद्रं अपृच्छत् ।

**सूत्रम् - ६** **गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ । १-४-५२**

गत्याद्यर्थानां शब्दकर्मणाम् अकर्मकाणां च अणौ यः कर्ता स णौ कर्म स्यात् । गतिः गमनम्। बुद्धिः अवगमनम्। प्रत्यवसानं भक्षणम् । शब्दकर्मा - शब्दः कर्म (श्लोकः, गद्यम्, मन्त्रः) एषां ते शब्दकर्माणः। अकर्मकः- यस्य धात्वर्थस्य कर्म एव न संभवति स इति। अणि - केवलावस्थायां, णौ प्रेरणावस्थायाम् इत्यर्थः। उदाहरणम्

शत्रूनगमयत् स्वर्गं वेदार्थं स्वानवेदयत्।
आशयच्चामृतं देवान् वेदमध्यापयत् विधिम्।
आसयत् सलिले पृथ्वीं, यः स मे श्रीहरिर्गतिः ।

| **अण्यन्तावस्था (केवलाः)** | **ण्यन्तावस्था (प्रेरणाः)** |
|---|---|
| शात्रवः स्वर्गम् अगच्छन् । | श्रीहरिः शत्रून् स्वर्गम् अगमयत् । |
| स्वे वेदार्थम् अविदुः। | श्रीहरिः स्वान् वेदार्थम् अवेदयत् । |
| देवाः अमृतम् आश्नन् । | श्रीहरिः देवान् अमृतम् आशयत्। |
| विधिः वेदम् अध्यैता । | श्रीहरिः वेदं विधिम् अध्यापयत् । |
| पृथ्वी सलिले आस्त । | श्रीहरिः सलिले पृथ्वीम् आसयत् । |
| बालः विद्यालयं गच्छति । | पिता बालं विद्यालयं गमयति। |
| छात्रः श्लोकार्थं बोधयति । | गुरुः छात्रं श्लोकार्थं बोधयति। |
| शिशुः ओदनं भुङ्कते। | माता शिशुम् ओदनं भोजयति। |
| बालः गद्यं पठति । | अध्यापकः बालं गद्यं पाठयति। |
| वृद्धः उपविशति । | तरुणः वृद्धम् उपवेशयति। |

**सूत्रम् -७** **हृक्रोरन्यतरस्याम्** । १-४-५३

हृक्रोरणौ यः कर्ता स णौ वा कर्म स्यात् । हारयति , कारयति, भृत्यम् भृत्येन वा घटम्।

**उदाः-** जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम्।
दशरथः द्विजैः द्विजान् वा जातकर्मादिकम् अकारयत्।

**सूत्रम् -८** **अधिशीङ्स्थासां कर्म।** १-४-४६

अधिपूर्वाणां शीङ्, स्था , आस् धातूनाम् आधारः कर्म स्यात् ।

**उदाः -** हरिः वैकुण्ठम् अधिशेते, अधितिष्ठति, अध्यास्ते।

दशरथः सिंहासनम् अध्यास्ते ।

**सूत्रम् -९** **उपान्वध्याङ् वसः** । १-४-४८

उपादिपूर्वस्य वसतेराधारः कर्म स्यात् । आदि शब्देन अनु , अधि, आङ् इत्येते उपसर्गाः सूच्यन्ते।

**उदाः -** हरिः वैकुण्ठम् उपवसति, अनुवसति, अधिवसति।

पौराः नगरम् उपवसन्ति, अनुवसन्ति, अधिवसन्ति।

अयोध्याम् अध्युवास भरतः ।

रावणः अखिलैः राक्षसैः साकं लङ्काम् अध्युवास।

**वार्तिकम्** **'अभुक्त्यर्थस्य न '**

वने उपवसति । वने भक्षणं विना वसति इत्यर्थः ।

**वार्तिकम्**

**'उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।**

**द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।। '**

उभयतः कृष्णं गोपाः । सर्वतः कृष्णं गोपाः। धिग् कृष्णाभक्तम् । उपर्युपरि लोकं हरिः । अध्यधि लोकम्। अधोऽधो लोकम्। धिगिममावस्थाम् (चम्पूरामायणे)धिग् तामवस्थां कमठेश्वरस्य (श्रीकृष्णविलासम्) धिगस्तु मां सत्वरकार्यमन्थरम् (नैषधे) धिग्जाल्मान् (उत्तररामचरिते)

**वर्तिकम्** **'अभितः परितः समयानिकषाहाप्रतियोगेऽपि '**

अभितः गुरुं शिष्याः । परितः ग्रामम्। ग्रमं समया नदी। निकषा लङ्काम्। हा कृष्णाभक्तम्। बुभुक्षितम् न प्रतिभाति किञ्चित् ।

**सूत्रम् -१० कालाध्वनोरत्यन्तसंयोगे ।** २-३-५

इह द्वितीया । कालस्य अध्वनश्च (मार्गस्य) गुणेन क्रियया द्रव्येण च निरन्तरसंयोगे गम्ये कालस्य अध्वनश्च द्वितीया भवति । मासं कल्याणी । मासमधीते। मासं गुडधानाः । क्रोशं कुटिला नदी । क्रोशमधीतः। क्रोशं गिरिः ।

**टिप्पणिः -**

अत्यन्तसंयोगः - निरन्तरसंयोगः। गुणक्रिया - द्रव्यैः कालाध्वनोः अविच्छिन्नसंयोगे गम्ये द्वितीया स्यात् इत्यर्थः । कल्याणी मङ्गलवान्।

गुणात्यन्तसंयोगस्य उदाहरणम् - मासं कल्याणी । मासं मङ्गलोत्सवः।
क्रियात्यन्तसंयोगस्य उदाहरणम् - मासमधीते। सप्ताहमधीते । एकमपि दिनम्। अनपहाय पठति इत्यर्थः।
द्रव्यात्यन्तसंयोगस्य उदाहरणम् - मासं गुडधानाः । (भृष्टयवाः - मलर्पोडी इति कैरल्यम्)
मार्गात्यन्तसंयोगस्य उदाहरणम् - क्रोशं कुटिला नदी । योजनं पठति। क्रोशं गिरिः। क्रोशमभिव्याप्य अविच्छिन्नतया पर्वतो राजते इत्यर्थः ।

'पीताश्वगन्धापयसार्धमासं ' समाः मसद्वयं इत्यादिषु नैरन्तर्यं सूच्यते। वर्षभोग्येण भर्तुः यक्षश्चक्रे(मेघसन्देशम्)

**सूत्रम् -११ अन्तरान्तरेण युक्ते ।** २-३-४

इह अपि द्वितीया स्यात् । अन्तरा , अन्तरेण इत्यनयोः मध्ये (विना इत्यर्थः)। अन्तरा त्वां मां हरिः । तव मम च मध्ये हरि इत्यर्थः। अन्तरेण हरिं न सुखम्। हरिं विना सुखं नास्ति इत्यर्थः ।

## ३. तृतीया विभक्तिः

**सूत्रम् -१२** **स्वतन्त्रः कर्ता** । १-४-५८

क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् ।

**टिप्पणिः-**

स्वातन्त्र्यं - प्राधान्यम्। धात्वर्थव्यापाराश्रयत्वम्। फलानुकूलव्यापारो धात्वर्थः । क्रियाश्रयः कर्ता इति फलितोऽर्थः। कर्मादीनामपि स्वातन्त्र्यविवक्षायां कर्तृत्वम् ।

**उदाः -** खड्गः छिनत्ति। स्थाली पचति। घटः पश्यति।

**सूत्रम् -१३** **साधकतमं करणम्।** १-४-४२

क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्।

**टिप्पणिः-**

क्रियासिद्धिः क्रियोत्पत्तिः। अतिशयितं साधकं साधकतमम् । यत् व्यापारानन्तरम् क्रियानिष्पत्तिः तत् प्रकृष्टम् ।

**उदाः-** इन्द्रः वज्रेण वृत्रं हन्ति। अत्र इन्द्रः कर्ता । प्राणवियोगरूपफलाश्रयत्वात् वृत्रः कर्म ।

प्राणवियोगरूपं फलं वज्रप्रयोगानन्तरमेव भवति इति वज्रः करणम् ।

रामः बाणेन रावणं हन्ति। बालः तूलिकया लेखं लिखति।

**सूत्रम् -१४** **कर्तृकरणयोः तृतीया।** २-३-१८

अनभिहिते कर्तरि करणे च तृतीया स्यात् । इन्द्रेण वज्रेण हतो वृत्रः । इन्द्रकर्तृकवज्रकरणक-हिंसाविषयो वृत्रः इत्यर्थः।

**उदाः-** रामेण बाणेन हतो बालिः। अमलेन खड्गेन भूरुहं छिनत्ति। छात्राः यानेन विद्यालयं गच्छन्ति।

**वार्तिकम्** **'प्रकृत्यादिभ्य उपसंख्यानम् '।**

प्रकृत्या कोमलः । प्रायेण वैदिकः। गोत्रेण राघवः । समेन हसति । द्रोणीत्रयेण धान्यं क्रीणाति। शतेन अजान् गृह्णाति । हर्षेण गायति। सुखेन दुःखेन वा जीवति। नाम्ना नलः। नाम्ना कुम्भोदरः। नाम्ना पम्पा ।

**सूत्रम् -१५** **सहयुक्तेऽप्रधाने**। २-३-१९

सहार्थेन युक्तेऽप्रधाने तृतीया स्यात् । सहार्थकपदानि तु साकं, सार्धं समम् इत्यादीनि । एतेषां योगे एतदर्थकपदानां पर्यायपदानां च योगेऽपि तृतीया स्यात् । भटेन सहागतः राजा । अस्मिन् वाक्ये राजा कर्ता , भटः अप्रधानम्।

**उदाः-** पुत्र्या साकमागता माता । पुत्रेण समं पिता आगच्छति। गुरुः शिष्यैः सार्धमागच्छति।

**'वृद्धो युना '** इति पाणिनीयनिर्देशात् सहादियोगं विनापि तृतीया स्यात् । केषुचिदवसरेषु सहादिपदाभावेऽपि तृतीया वृद्धो यूना सह परिचयात् त्यज्यते कामिनीभिः । (भोजप्रबन्धः)

**सूत्रम् -१६** **हेतौ**। २-३-२३

हेत्वर्थे तृतीया स्यात् । हस्तेन लेखः । दण्डेन घटः । भक्त्या पूजितो रामः । फलमपीह हेतुः। प्रयत्नेन जीवति । अत्र प्रयत्नस्य जीवनं प्रति कारणत्वम्। अतः हेतुभूतात् प्रयत्नात् तृतीया अनेन सूत्रेण।

**टिप्पणिः -**

हेतुरिह कारणपर्यायो लौकिकः एव विवक्षितः। आदिना गुणक्रियासंग्रहः । द्रव्यं गुणं क्रियां च प्रति यज्जनकं तत्र सर्वत्र विद्यमानमित्यर्थः। द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वम् । करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च ।

**वार्तिकम्** **'गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका '**

अलं श्रमेण। श्रमेण साध्यं नास्ति इत्यर्थः। इह गम्यमानां साधनक्रियां प्रति श्रमः करणम्। अलं विस्तरेण - विस्तरेण बोध्यं किमपि नास्ति इत्यर्थः। अलं युद्धेन, अलं दण्डनेन, अलं भोजनेन । अलं महीपाल तव श्रमेण (रघुवंशम्) अलं भयेनात्मयोने (श्रीरामोदन्तः)

**सूत्रम् -१७** **येनाङ्गविकारः।** २-३-२०

येन अङ्गेन विकृतेन अङ्गिनो विकारो लक्ष्यते ततः तृतीया स्यात् । अक्ष्णा काणः । अक्षिसम्बन्धि काणत्वविशिष्टः इत्यर्थः । काणः रात्र्यन्धः । पादेन खञ्जः। कर्णेन बधिरः।

## ४. चतुर्थी विभक्तिः

**सूत्रम् -१८** **कर्मणा यमभिप्रैति सः सम्प्रदानम्** । १-४-३२

दानस्य कर्मणा यमभिप्रैति सः सम्प्रदानसंज्ञः स्यात् ।

**टिप्पणिः-** सम्प्रदीयते अस्मै इति सम्प्रदानम् ।

**सूत्रम् -१९** **चतुर्थी सम्प्रदाने** । २-३-१३

सम्प्रदानवाचकात् शब्दात् चतुर्थी विभक्तिः। राजा विप्राय गां ददाति । पिता पुत्राय फलं ददाति। अत्र पुत्रं उद्दिश्य फलं ददाति इत्यर्थः। दानस्य कर्मणा फलेन पुत्रः उद्दिश्यते। गुरुः शिष्याय विद्यां ददाति।

**सूत्रम् -२०** **नमः स्वास्तिस्वाहास्वधालंवषड्योगाच्च** । २-३-१६

एभिः योगे चतुर्थी स्यात्। हरये नमः। विष्णवे नमः । गुरवे नमः । नमः शिवाय । प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा । अलमिति पर्याप्त्यर्थग्रहणम् । तेन दैत्येभ्यो हरिरलं प्रभुः - समर्थः, शक्तः इत्यादि।

**उदाः-** तस्यालमेषा क्षुधितस्य तृप्त्यै (रघुवंशम्)। परितोषाय मेऽङ्गानि न प्रभवन्ति । (कुमारसम्भवम्)।

**सूत्रम् -२१** **रुच्यर्थानां प्रीयमाणः** । १-४-३३

रुच्यर्थानां धातूनां प्रयोगे प्रियमाणोऽर्थः संप्रदानं स्यात्। हरये रोचते भक्तिः। बालकाय गुडः रोचते।

**टिप्पणिः -**

प्रीयमाणः समवायेन प्रीत्याश्रयः। 'रुच्' दीप्तावभिप्रीतौ च । दीप्तिरिह न रुच्यर्थः। तथा च प्रीतिजनकार्थानामित्यर्थः।

**सूत्रम् -२२** **क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः** । १-४-३६

क्रुधाद्यर्थानां योगे यं प्रति कोपः सः उक्तसंज्ञः स्यात् । क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति इत्येतेषां तत्पर्यायाणां च प्रयोगे यं प्रति कोपः सः संप्रदानसंज्ञां प्राप्नोति इत्यर्थः।

**उदाः-** रमायै क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति वा। धनिकः दरिद्राय क्रुध्यति। कंसः कृष्णाय क्रुध्यति। सूर्यः इन्द्राय ईर्ष्यति। अत्र इन्द्रं प्रति सूर्यस्य ईर्ष्या , अतः इन्द्रः संप्रदानम्।

**टिप्पणिः -**

क्रोधोऽमर्षः । द्रोहोऽपकारः। ईर्ष्या- अक्षमा(असहनम्) असूया गुणेषु दोषाविष्कारः ।

**सूत्रम् -२३** **क्रियार्थोपदस्य च कर्मणि स्थानिनः** । २-३-१४

क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनो अप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात् । फलेभ्यो याति । फलान्याहर्तुं याति।

**उदाः-**

यशोधनो धेनुमृषेर्मुमोच वनाय - अत्र वनाय नेतुं इति प्रयोक्तव्ये नेतुं इति तुमुन्नन्तस्य अप्रयोगे वनाय इति चतुर्थी (रघुवंशम्) । कुलं च नः सत्यधनं ब्रवीमि ते - तुभ्यं कथयामि , त्वां बोधयितुम् कथयामि इत्यर्थः ।

## ५. पञ्चमीविभक्तिः

**सूत्रम् -२४** **ध्रुवमपायेऽपादानम्** । २-४-२४

अपायो विश्लेषः । तस्मिन् साध्ये यद् ध्रुवम् अवधिभूतं कारकं तद् अपादानं स्यात् ।

टिप्पणिः-

ध्रुवम् - द्वयोः संयुक्तवस्तुनोः अन्यतरस्य चलनात् विश्लेषः इति स्थितिः। तत्र तादृशं चलनाश्रयभूतं ध्रुवम् ।

**सूत्रम् -२५** **अपादाने पञ्चमी** । २-३-२८

अपादाने पञ्चमी विभक्तिः भवति इत्यर्थः। रषीदः ग्रामाद् आयाति। भटः धावतः अश्वात् पतति। हस्तात् भाजनं पतति।

**वार्तिकम्** **' जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् '**

जुगुप्साविषयस्य , विरामविषयस्य , प्रमादविषयस्य च अपादानसंज्ञा भवति।

**उदाः-** पापात् जुगुप्सते। अधर्मात् विरमति। धर्मात् प्रमाद्यति। कश्चित्कान्ता विरहगुरुणा स्वाधिकारात् प्रमत्तः - इति मेघसन्देशः।

**सूत्रम् -२६** **भीत्रार्थानां भयहेतुः** । २-४-२५

भयार्थानां , त्राणार्थानां च धातूनां प्रयोगे भयहेतुरपादानं स्यात् । चोरात् बिभेति। चोरात् त्रायते। व्यधात् रक्षति। शुनकात् रक्षति। ' मारुतपुत्रात् तस्मात् तत्रास ' - सीतादर्शनम्। गुरोः कृशानुप्रतिमात् बिभेषि।- रघुवंशम्।

**सूत्रम् -२७** **पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्** । २-३-३२

पृथक्, विना, नना एभिः योगे तृतीया , पञ्चमी, द्वितीया वा स्यात् ।

**उदाः-** पृथक् रामेण , रामात्, रामाय वा । एवं विना नाना च । विना विद्यया, विना विद्यायाः, विना विद्याम् । वृद्धत्वं जरसा विना (रघुवंशम्)। नाना नारीं निष्फला लोकयात्रा । विना गोरसं को रसो भोजनानाम्। रामाद् विना न अन्या गतिः।

**सूत्रम् -२८** **अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदजाहियुक्ते** । २-२-२९

एतैः योगे पञ्चमी स्यात् । अन्य इति अर्थग्रहणम्। इतरग्रहणं प्रपञ्चार्थम् । अन्यो भिन्नः

इतरो वा कृष्णात् । आरात् वनात् । ऋते कृष्णात् । पूर्वो ग्रामात् । अञ्चुधातुः उत्तरपदं यस्य सः अञ्चूत्तरपदः ।

**सूत्रम् -२९** **आङ् मर्यादावचने** । २-८-३२

आङ् मर्यादायां कर्मप्रवचनीयसंज्ञः स्यात् ।

**सूत्रम् -३०** **पञ्चम्यपाङ्परिभिः** । ३-३-२०

अप आङ् परि एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात् ।

**उदाः-** अप हरेः , परि हरेः संसारः। हरिं विहाय संसारः इत्यर्थः। आमुक्तेः संसारः। आसकलात् ब्रह्म। यशः आचन्द्रतारं विलसतु । बहिः शब्दयोगे पञ्चमी - गृहात् बहिः ।

टिप्पणिः - आचन्द्रताराभ्यः - आचन्द्रतारम्।

## ६. सप्तमी विभक्तिः

**सूत्रम् -३१** **आधारोऽधिकरणम्** । २-४-४५

कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारः कारकम् अधिकरणसंज्ञा स्यात्।

**सूत्रम् -३२** **सप्तम्यधिकरणे च** । २-३-३६

अधिकरणे सप्तमी स्यात्। चकारात् दूरान्तिकार्थेभ्यः। आधारः त्रिधा - औपश्लेषिकः। वैषयिकः । अभिव्यापकश्च।

**उदाः-**कटे उपविशति। अत्र सम्बन्धः संयोगः। अतः अयम् औपश्लेषिकः आधारः। तथा - माता स्थाल्यां पचति। विजये इच्छास्ति, मोक्षे इच्छास्ति। वैषायिकाधारः। सर्वस्मिन्नीश्वरोऽस्ति, सर्वस्मिन्नात्मा अस्ति। अभिव्यापकः । वनस्य दूरे अन्तिके वा ।

**टिप्पणिः -**

औपश्लेषिकः - उपश्लेषसम्बन्धकृतः। उपश्लेषः संयोगदिसम्बन्धः। अव्याप्यवृत्तिः सम्बन्धः।

वैषयिकः - विषयतासम्बन्धकृतः । अहं मम मातरि स्निह्यामि, पितरि स्निह्यामि, राष्ट्रे स्निह्यामि इत्यादि।

अभिव्यापकः - सकलावयवव्याप्तिकृतः आधारः । व्याप्यवृत्तिः सम्बन्धः। तिले तैलम्। सर्वत्राभिव्याप्तम् इत्यर्थः।

**सूत्रम् -३३ यस्य च भावेन भावलक्षणम्** । २-३-३७

यस्य क्रियया क्रियान्तरं लक्ष्येत ततः सप्तमी स्यात्। गोषु दुह्यमानासु गतः कृष्णः। अत्र द्वे क्रिये भवतः। तयोः एकस्याः क्रियायाः कालः अज्ञातः भवति। अपरस्याः क्रियायाः कालः ज्ञातः च भवति। अतः गोशब्दात् सप्तमी।

**टिप्पणिः-**

भवशब्दौ क्रियापर्यायौ क्रिया च कर्त्राश्रया कर्माश्रया च । कर्माश्रयस्य उदाहरणम्- गोषु इति।

**सूत्रम् -३४ यतश्च निर्धारणम्** । २-३-४१

जातिगुणक्रियासंज्ञाभिः समुदायाद् एकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः।

जातिवाचकः - वृक्षः, गौः। गुणवाचकः - शुक्लः, कपिलः। क्रियावाचकः - गच्छन् , धावन्। संज्ञावाचकः-देवदत्तः, चैत्रः।

**उदाः-** बालानां बालकेषु च सुन्दरं राजू। गवां गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावन् शीघ्रः।

**टिप्पणिः -**

मृगाणां / मृगेषु वा सिंहः श्रेष्ठः - जात्या पृथक्करणम्। नदीनां / नदीषु निला बहूदका इत्यत्र गुणेन पृथक्करणम्। गायतां / गायत्सु वा गायन् उच्चैः इत्यत्र क्रियया पृथक्करणम्। छात्राणां/ छात्रेषु वा वेणुः पटुः इत्यत्र संज्ञया पृथक्करणम्।

**सूत्रम् -३५ षष्ठी चानादरे** । २-३-३८

अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः। रुदति रुदतो वा अगमत्। रुदन्तं पुत्रादिकम् अनादृत्य आतुरालयम् अगमदित्यर्थः । राक्षसाः शलभा इव हताः पश्यतो रावणस्य - पश्यन्तं रावणम् अनादृत्य इत्यर्थः।

## ७. षष्ठी विभक्तिः

**सूत्रम् -३६ षष्ठी शेषे** । २-३-५०

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः। तत्र षष्ठी स्यात्। उक्तादन्यः शेषः। कर्मकर्तृकरणसम्प्रदानापादानाधिकरणानि उक्तानि। प्रातिपदिकार्थश्च उक्तः। कः एतेभ्यः अतिरिक्तः अस्ति? इति चेत् स्वस्वामिभावः, जन्यजनकभावः, अवयवावयवविभावः इत्यादयः सम्बन्धाः।

यथा - राज्ञः पुरुषः। राजसम्बन्धी पुरुषः इत्यर्थः । अत्र पुरुषः प्रधानम्। अप्रधानात् षष्ठी इत्यर्थः। द्रोणस्य पुत्रः द्रोणसम्बन्धी पुत्रः इति। गजस्य शीर्षम्- गजसम्बन्धि शीर्षम् इति । कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव । सतां गतम्। मातुः स्मरति। सर्पिषो जानीते। सर्पिषा उपायेन प्रवर्तते इत्यर्थः। देवदत्तः मातुः स्मरति। अत्र मातृशब्दात् षष्ठी। मातृसम्बन्धिस्मरणमित्यर्थः। एधोदकस्य उपस्कुरुते। उपस्करणम् गुणाधानम्। एधः काष्ठम्, उदकस्य जलस्य गुणाधानं करोतीत्यर्थः। एधः कर्तृकजलसम्बन्धिः, उपस्करणं-गुणाधानमिति यावत्।

**सूत्रम् -३७ षष्ठी हेतुप्रयोगे** । २-३-२६

हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् । अन्नस्य हेतोर्याति। अल्पस्य हेतोः बहु हातुमिच्छन्

(रघुवंशम्)

**सूत्रम् -३८** **एनपा द्वितीया**। २-३-३१

एनबन्तेन योगे द्वितीया स्यात्। एनपा इति योगविभागत्षष्ठ्यपि। दक्षिणेन क्षेत्रम् क्षेत्रस्य वा। एवम्- उत्तरेण विद्यालयं विद्यालयस्य वा। पूर्वेण ग्रामं ग्रामस्य वा ।

तस्मत् व्रज लघुगतिर्भूयसेवोत्तरेण(मेघसन्देशम्)। जीर्णमातृगृहस्य उत्तरेण विल्ववाटिकामध्यास्ते (हर्षचरितम्)। उत्तरेण सुवर्णपुरं निर्मानुषमरण्यम् (कादम्बरी)। दक्षिणेन वृक्षेण वृक्षवाटिकाम् आलाप इव श्रूयते (शाकुन्तलम्)।

**सूत्रम् -३९** **दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्** । २-३-३४

एतैर्योगे षष्ठी स्यात्पञ्चमी च। दूरं निकटं ग्रामस्य ग्रामाद्वा। दूरं आपणस्य विद्यालयम्, आपणाद्वा। विद्यालयादन्तिकं देवालयम्। देवलायस्य दूरं / दूरेण / दूरात् वनम् अस्ति।

**टिप्पणिः-**

दूरार्थकैः अन्तिकार्थकैः च दूरान्तिकार्थैः।

**सूत्रम् -४०** **कृत्यानां कर्तरि वा** । २-३-७१

कृत्यप्रत्ययान्तानां योगे कर्तरि षष्ठी वा स्यात्। षष्ठीपक्षे- लोकहितं मम करणीयम्। तदभावपक्षे तृतीया कर्तरि - लोकहितं मया करणीयम्। मया हरिः सेव्यः। मम हरिः सेव्यः।

उदाः-गन्तव्या ते वसतिरलका नाम यक्षेश्वराणाम् (मेघसन्देशम्)

**टिप्पणिः -**

कृत्यप्रत्ययाः - तव्यत् - तव्य - अनीयरः

## पठनप्रवर्तनानि

**कक्ष्यायां चर्चित्वा अधोरेखाङ्कितानां पदानां विभक्तीनां प्रयोगसाधुतां सप्रमाणं लिखतु।**

क. वानरः वृक्षम् अधिशेते ।

ख. कपोतः शाखाम् अधितिष्ठति ।

ग. षिबुः ग्रामे वसति।

घ. मृगाः काननम् अधिवसन्ति।

ङ. मात्रा सह पुत्रः आतुरालयम् अगच्छत् ।

च. पुत्रेण विना पिता देवालयमगच्छत् ।

छ. शुनकात् भयेन बालिका अरुदत्।

ज. मूषकः मार्जारात् त्रस्यति।

झ. विप्राय गां ददाति।

ञ. बालाय पायसं रोचते।

ट. सर्वाभ्यः प्रजाभ्यः स्वस्ति।

ठ. वृक्षात् फलं पतति।

ड . अनिलस्य विजये इच्छास्ति।

ढ. विद्यालये छात्राः वर्तन्ते।

श्रद्धेयाः अंशाः

चर्चा ।

सूत्राणामाशयज्ञानम्।

लिखित्वा अवतारणम्।

**वाक्यं पठित्वा कक्ष्यायां चर्चित्वा निर्दिष्टपदानां कारकं निर्दिशतु।**

रषीदः रमेशेन सह विद्यालयात् क्रीडाङ्गणं गत्वा क्रीडानन्तरं द्विचक्रिकायां गृहं प्राप्य पठने व्यापृतः अभवत्।

रमेशेन , विद्यालयात् , द्विचक्रिकायाम् , गृहम् , पठने , क्रीडाङ्गणम् , रषीदः।

श्रद्धेयाः अंशाः

चर्चा ।
विभक्तिज्ञानम्।
लिखित्व अवतारणम्।

**कक्ष्यायां चर्चित्वा यदा -तदा इत्यस्य स्थाने सति सप्तम्याः प्रयोगेण वाक्यं परिवर्तयतु ।**

**यदा गुरुः कक्ष्यां प्रविशति तदा शिष्याः उत्तिष्ठन्ति।**

**यदा सूर्यः अस्तं गच्छति तदा तमः व्याप्नोति।**

**यदा वर्षा आगच्छति तदा छत्रम् उद्घाटयति।**

**यदा गीतं समाप्तः तदा सदस्याः करघोषमकुर्वन्।**

**यदा लोकयानमागच्छति तदा यात्रिकः अन्तः प्रविशति।**

श्रद्धेयाः अंशाः

चर्चा ।
प्रयोगज्ञानम्।
लिखित्व अवतारणम्।

**चर्चित्वा अधो दत्तानि सूत्राणि सोदाहरणम् विशदयतु।**

**कर्तुरीप्सिततमं कर्म। हेतौ । रुच्यर्थानां प्रीयमाणः । अपादाने पञ्चमी।**

श्रद्धेयाः अंशाः

चर्चा ।

सूत्रस्याशयज्ञानम् ।

उदाहरणैः समन्वयनम्।

विभक्तीनां प्रयोगसाधुतानिरूपणं लिखित्वा अवतारयतु।

# किमधिगतम्

निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

# ഭാരതത്തിന്റെ ഭരണഘടന

## ഭാഗം IV ക

## മൗലിക കർത്തവ്യങ്ങൾ

**51 ക. മൗലിക കർത്തവ്യങ്ങൾ – താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ്:**

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയ സേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക. സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സംസ്കാരസമന്വയത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക.

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

# കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹ്യനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മിഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപത്കരമായ ജോലികളിൽ നിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽ നിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

## നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.


ബന്ധപ്പെടേണ്ട വിലാസം:

**കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ**
'ശ്രീ ഗണേഷ്', റ്റി.സി. 14/2036, വാൻറോസ് ജംഗ്ഷൻ,
കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം-34, ഫോൺ: 0471-2326603
ഇ-മെയിൽ: childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in
വെബ്സൈറ്റ്: www.kescpcr.kerala.gov.in


**ചൈൽഡ് ഹെൽപ്പ്ലൈൻ - 1098, ക്രൈം സ്റ്റോപ്പർ - 1090, നിർഭയ - 1800 425 1400**
**കേരള പോലീസ് ഹെൽപ്പ് ലൈൻ - 0471 - 3243000/44000/45000**

*online R.T.E Monitoring: www.nireekshana.org.in*